ISSN – 2349-3100 Peer Reviewed

त्रिंशोऽङ्कः AUG 2021 Refereed Journal

अन्ताराष्ट्रियमूल्यांकितत्रैमासिकसन्दर्भितशोधपत्रिका

# वेदज्योतिष्मती

Vedajjyotishmati

संरक्षकाः

प्रो. रामचन्द्रझाः,

प्रो. देवेन्द्रमिश्रः, प्रो. शिवाकान्तझाः

प्रधानसम्पादकः

प्रो. हंसधरझाः

सम्पादकः

डॉ. आशीषकुमारचौधरी

प्रकाशकः

संस्कृत-अनुसंधान-संस्थानम्, के. एम. टैंक लहेरियासरायः, दरभंगा

## सम्पादकमण्डलम्

**1 प्रो.बोधकुमारझाः**
आचार्य, व्याकरण-विभाग,
क. जे. सोमैया-संस्कृतविद्यापीठ, मुम्बई ।

**2 प्रो. हंसधरझाः**
ज्योतिष विभाग ,आचार्य,
राष्ट्रिय संस्कृत संस्थान , भोपाल परिसर, भोपाल।

**3 प्रो. प्रमोदवर्धनकौण्डिल्यायनः,**
विभागाध्यक्ष, मीमांसा दर्शन विभाग नेपाल,
नेपाल संस्कृत विश्वविद्यालय, काठमाण्डु, नेपाल ।

**4 जूही जेनोजे**
आचार्या,दर्शन विभाग,
कोरिया विश्वविद्यालय, सीओल, कोरिया ।

**5 आचार्या पुनिता शर्मा**
आचार्या ,संस्कृत विभाग,
वेंकेटेश्वर महाविद्यालय
दिल्ली विश्वविद्यालय।

**6 डॉ. धनञ्जयमणित्रिपाठी**
आचार्य ,संस्कृत विभाग,
जामिया मिल्लिया इस्लामिया, दिल्ली ।

**7 डॉ. दिलीपकुमारझाः**
विभागाध्यक्ष-धर्मशास्त्र विभाग
कामेश्वर सिंह संस्कृत विश्वविद्यालय, दरभंगा ।

**8 डॉ. राजीवमिश्रः**
आचार्य ,संस्कृत विभाग,
मोदी विश्वविद्यालय, राजस्थान ।

**9 टेल्टो डेल्टेज**
आचार्य दर्शन एवं संस्कृति विभाग,
हेल्डमार्ग विश्वविद्यालय,हेल्डनवर्ग, जर्मनी।

**10 प्रो. विद्यानन्द झाः**
पूर्व.प्राचार्य,
भोपाल परिसर, भोपाल।

**पुनर्वीक्षणमण्डलम्**

1. **आचार्या पुनिता शर्मा**
वेंकेटेश्वर महाविद्यालय
दिल्ली विश्वविद्यालय,दिल्ली।
2. **आचार्य नीलाम्बर चौधरी**
आचार्य रामभगत राजीवगाँधी महाविद्यालय दरभंगा।

**सहसंपादक**

**1.डा. अनिल कुमार,** रा. सं. सं भोपाल परिसर, भोपाल।
**2. डा. आस्तीक द्विवेदी**, रा. सं. सं भोपाल परिसर, भोपाल

**प्रबंधक संपादक**

1. **श्री पंकज ठाकुर**

**प्रबंधक- सहसंपादक- डा.रविन्द्र प्रसाद उनियाल**

**परामर्शदातृसंपादकः**

1. **डॉ. रंजय कुमार सिंह**
रा. सं. संस्थान, मुम्बई परिसर ।

**सहसंपादिका**

**1.डॉ गीता दूबे** ,रा. सं. संस्थान, मुम्बई।

**संगणक सहयोग- रोहित पचौरी**


**वर्षम्-AUG 2021**

@copy right – Sanskrit Anusandan Sansthan Email – rsas.kothram@gmail.com, vjvv.rs@gmail.com,
Ph No. 06272-224671, 09619269812, 07506137027 मूल्य-300/

पत्रिका में प्रकाशित लेखों से प्रकाशक का सहमत होना अनिवार्य नहीं है। विवाद का समाधान दरभंगा न्यायालय से ही स्वीकार्य है ।लेखों को परिवर्तित, स्वीकृत एवं अस्वीकृत करने का पूरा अधिकार प्रकाशक को होगा ।A Multilanguage Educational Sanskrit Research Journal Published by the Sanskrit Anusandhan Sansthan, Darbhanga

**From letter no-671/2014-15 Place on Rashtriya Sanskrit Anusandhan Sansthan will kown as the Sanskrit Anusandhan Sansthan, Darbhanga**

ISSN – 2349-3100


# सम्पादकीयम्

भारतीयज्ञानविज्ञानयोर्निधिरस्माकं वेदपुराणस्मृत्यादयः। तस्य च ज्ञानविज्ञानस्य संरक्षणे संवर्धने सततं निर्वहन्ति भूमिकां पुराकालत एव प्रकाश्यमाना ग्रन्थ-पत्र-पत्रिकादयः। तस्मिन्नेव क्रमे महत्त्वपूर्णां भूमिकां निर्वन्ती दरीदृश्यते ‘संस्कृत-अनुसन्धान-संस्थानम्’ इति नामिका संस्था, यया बहुभ्योऽपि वर्षेभ्योऽनवरतं प्रकाश्यते अन्ताराष्ट्रीया सान्दर्भिकी त्रैमासिकी वेदज्योतिष्मतीति नामधेया शोधपत्रिका।

तत्र पत्रिकाया अस्या ऐषमो द्वात्रिंशोऽप्यङ्कः प्राकाश्यमेतीति सन्तोषास्पदम्। एष अङ्कोऽपि देशस्य विविधविदुषां ज्ञानविज्ञानमयैश्शोधलेखै राराज्यत इत्यपरं सन्तोषस्थानम्। आशासे विदुषां ज्ञानविज्ञानगुम्फितोऽयं द्वात्रिंशोऽप्यङ्कः संस्थाया यशसे स्यादेव।

अथात्र त्रिंशोङ्कस्य प्रकाशने ज्ञानविज्ञानमयलेखप्रदानेन, सम्पादनकर्मणा, किंवा टङ्कणादिकर्मभिर्वा यैरुदारहृदयैः सहाय्यं विहितं तेषां समेषां कृते हार्दं साधुवादं वितीर्य कामये भगवन्तं भूतभावनं महाकालम् –

गुणैकपक्षपातिनां सहृदयानां विदुषां शुभाशंसनमपेक्षमाणः ।



**प्रधानसम्पादकः**
(प्रो. हंसधरझाः)

ISSN – 2349-3100

## विषयसूची पृष्ठसंख्या

| | | |
|---|---|---|
| सम्पादकीयम् | प्रो.हंसधरझाः | 3 |
| पदशास्त्रस्य वैशिष्ट्यम् | प्रो. रामान्दमिस्रः | 5 |
| नागेश्वरज्योतिर्लिङ्गस्य निरूपणम् | आचार्य नीलाम्बर चौधरी | 14 |
| सामुद्रिकशास्त्र और साहित्यशास्त्र | डा.कविता शर्मा | 29 |
| महर्षि पतंजलि क्रिया योग का समीक्षात्मक अध्ययन | नरेंद्र कुमार भट्ट | 35 |
| महाकविराधावल्लभत्रिपाठीकृतसम्प्लवकाव्यसङ्ग्रहग्रन्थे ध्वनिसौन्दर्यवैशिष्ट्यम् | कृष्णदत्तमिश्रः | 41 |
| मुक्तककाव्य झांकार | किरण मिश्रा | 49 |
| नव्यसंस्कृतकवीनां जातकेषु कवित्वयोगविमर्शनम् | विघ्नेश-अय्यरः | 57 |

ISSN – 2349-3100

# पदशास्त्रस्य वैशिष्ट्यम्

✍प्रो. रामान्दमिस्रः

पदवाक्यप्रमाणशास्त्राणि प्रचीनतमानि विद्यन्ते, तत्रापि पदशास्त्रं नाम व्याकरणशास्त्रम् यत् वेदस्य प्रथमं प्रधानमङ्गं वर्त्तते। भर्तृहरिः स्वकारिकायाम् अवोचत्-

**आसन्नं ब्रह्मणस्तस्य तपसामुत्तमं तपः।**

**प्रथमं छन्दसामङ्गं प्राहुर्व्याकरणं बुधाः ।। वा.प.११**

अस्य शास्त्रस्य प्रभावः अपरेण श्लोकेन उच्यते-

**तद्वारमपवर्गस्य वाङ्मलानां चिकित्सितम्।**

**पवित्रं सर्वविद्यानामधिविद्यं प्रकाशते।।वा.प.१४**

शास्त्रमिदं मोक्षदायकं साक्षाद्वेदस्य प्रमुखमङ्गं वर्त्तते। पदशास्त्रं श्रुतेरङ्गम् अतः यथा श्रुतिः अनादिः तथैव व्याकरणशास्त्रमपि इत्यवगतं भवति महाभाष्ये-

**"सिद्धे शब्दार्थसम्बन्धे"**[४] इति वार्त्तिके शब्दः सिद्धः अर्थः सिद्धः सम्बन्धश्च सिद्धः। अतः गोपथब्राह्मणे उच्यते-पदशास्त्रस्य स्रोतः नादबिन्दुः-कलास्वरूपः प्रणवेति। तथाहि-"ओङ्कारं पृच्छामः को धातुः? किं प्रातिपदिकम्? किं नामाख्यातम् ? किं लिङ्गम्? किं वचनम्? का विभक्तिः? कः प्रत्ययः? इति[५] समाधानं ऋषयः ऊचुः-आख्यातोपसर्गाऽनुदात्तस्वरितलि-ङ्गविभक्तिवचनानि च संस्थानाध्यायिनः आचार्याः पूर्वे बभूवुः।[६] स्फोटसिद्धान्तेऽपि अस्य शास्त्रस्य नित्यता प्रदर्श्यते-

**वाक्यस्य बुद्धौ नित्यत्वमर्थयोगं च लौकिकम्।**

**दृष्ट्वाचतुष्ट्वं नास्तीति वार्ताक्षौदुम्बरायणौ।।**[७]

शास्त्रेऽस्मिन् विविधपूर्वाचार्याणां स्मरणं क्रियते। अस्य मूलं वेदः अङ्गीक्रियते, अतः शाश्वतं नित्यं व्याकरणशास्त्रमित्युच्यते। वैदिकमन्त्रेषु विविधपाठाः, व्युत्पत्तयः च परिलक्ष्यन्ते।

यथा-यज्ञेन यज्ञमयजन्त देवास्तानि।[८] ऋक् १/१६४/५०। ये सहांसि सहसा सहन्ते।[९] ऋक् ६/६६/९ ।पूर्वीश्श्नन्तावश्विना।[१०] ऋक् ८/५/३१। धान्यमसि धिनुहि देवान् प्राणायत्वा।[११] यजु.१/२०।केतपूः केतं नः पुनातु।[१२] (११/७) ।येन देवाः पवित्रेणात्मानं पुनते सदा।[१३] साम.उ.५/२/८/५ ।तीर्थैस्तरन्ति।[१४] अथर्व १८/४/७।यददः सं प्रयतीरहावनदता।[१५] हते तदाप्नोदिन्द्रो वो यतीस्तस्मादापो अनुष्ठन्।[१६] अथर्व ३/१३/२।

महर्षि: पतञ्जलिरपि प्रमाणभूताचार्य: एवमकथयत्-चत्वारि श्रृङ्गा१७, चत्वारि वाक्यपरिमितानि[१८], उतत्व:[१९], सक्तुमिव[२०], सुदेवोऽसि[२१], एते मन्त्रा: व्याकरणशास्त्रप्रमाणानि वर्तन्ते । प्रमाणभूता: सर्वे मन्त्रा: ऋग्वेदे उपलभ्यन्ते । चत्वारि 'वाक्परिमितानि' इति मन्त्रस्य व्याकरणे व्याख्या इत्थं वर्तते-नामाख्याते चोपसर्गनिपाताश्चेति वैयाकरणा: । निरुक्ते १३/९ । न केवलं पदशास्त्रस्योत्पत्ति: किन्तु व्याकरणपदं कस्माद्धातोः उत्पन्न इत्यपि यजुषि[२२] वर्तते अर्थपरिचयपुरस्सरम् । केचित्तु अस्य पदशास्त्रोत्पत्तिविषये इत्थं भणन्ति-

"अस्य पदशास्त्रस्योत्पत्ति: वैदिकपदपाठकाले अभूदिति (३२०० विक्रम पर्वम्)[२३] प्रकृतिप्रत्ययविभागोऽपिवैदिककाले दृश्यते । धातूपसर्गविषयेऽपि[२४] पदपाठे समुपलभ्यन्ते एवमेव समासघटितपूर्वोत्तरपदानां विभाग: कृतो वर्तते ।[२५] वाल्मीकिरामायणकालेऽपि व्याकरणशास्त्रवेत्ता आसीत् ।[२६] त्रेताकाले श्रीरामभक्त: हनुमनिति । हनुमत: पितृचरणा: श्रीवायुदेवोऽपि पदशास्त्रज्ञ इति[२७] प्रसिद्धम् । करणशब्दस्य व्याकरणशास्त्राय पुरापि प्रयोगः कुर्वन्ति स्म । रामायणे, मुण्डकोपनिषदि, गोपथब्राह्मणे, महाभारते अस्य पदशास्त्रस्य सन्ति बहुधाप्रमाणानि, अस्य शास्त्रस्य कालान्तरे धाराद्वयम् अभूत् । यथा शेखरादिग्रन्थेषु प्रथमाचार्य: शिव: इत्युच्यते।[२८] महाभाष्येऽपि एवं हि श्रूयते-बृहस्पर्तिरिन्द्राय दिव्यं वर्षसहस्रं प्रतिपदोक्तानां शब्दानां शब्दपारायणं प्रोवाच नान्तं जगाम बृहस्पतिश्च प्रवक्ता, इन्द्रश्चाध्येता, दिव्यं वर्षसहस्रमध्ययनकालो न चान्तं जगाम किं पुनरद्यत्वे । अन्यदपि ब्रह्मा बृहस्पतये बृहस्पतिरिन्द्राय इन्द्र: भरद्वाजाय, भरद्वाज: ऋषिभ्यो, ऋषय: ब्राह्मणेभ्य: शब्दपारायणं जगाम।[२९] एवम्प्रकारेण अस्य व्याकरणशास्त्रस्य ब्रह्मा प्रवक्ता । किन्तु अस्य शास्त्रस्य यदि ब्रह्मादय: प्रवक्तार: तर्हि नूनमेव श्रेयसिद्धिकारकं सर्वशास्त्रोपकारकमनादि नास्ति तत्र शङ्कापङ्कालेपः। कालान्तरे अनेकधा व्याकरणं सञ्जातं तद्यथा-

**ऐन्द्रं चान्द्रंकाशकृत्स्नं कौमारं शाकटायनम् ।**

**सारस्वतं चापिशलं शाकल्यं पाणिनीयकम् ।।**[३०]

अपिच-

कथासरितसागरे गीतासारमिदं शास्त्रं गीतासारसमुद्भवम् । अत्र स्थितं ब्रह्मज्ञानं वेदशास्त्रसमुच्चयम्। अष्टादश पुराणानि नव व्याकरणानि च । निर्मथ्य चतुरो वेदान् मुनिना भारतं कृतम् ।[३१] तत्र व्याडिप्रभृतीनां व्याकरणशास्त्रावतारविषये उच्यते शिवगणौ पुष्पदन्तमाल्यवन्तौ शापवशाद् भूलोकं सम्प्राप्य पाणिने: व्याकरणस्य इतिवृत्तं कथासरित्सागरे ऊचतु:-

**व्याडिरेकस्तयोर्मध्यात्तन्मातरमभाषत ।**

 ISSN – 2349-3100

**देवस्वामी करम्बश्च सोदरौ प्राग्बभूवतु: ।।१ ।।**

**अहं व्याडिर्द्वितीयस्य जनक: संस्थितश्च मे ।**

**इन्द्रदत्तपिता यातस्तच्छोकेन महापथम् ।।२ ।।**

**उपनीय ततो व्याडिर्वेदार्हत्वाय तं शिशुम् ।**

**जग्राह मात्रा कथमप्यनुज्ञातं सबाष्पया ।।३ ।।**

**लब्ध्वा वररुचिं गाढप्रमोदौ तरसा तत: ।**

**व्याडीन्द्रदत्तौ वर्षस्य गुरो: प्राप्तौ निकेतनम् ।।४ ।।**

शब्दव्याख्यानरूपेण व्याकरणेन हि पदादिविभागश: ऋग्वेदादयो ज्ञायन्ते छान्दोग्योपनिषदि 'वेदानां वेदम्......अध्येमि'(७.२) इतीदं व्याकरणं वेदानां वेदतया प्रसिद्धिं गतम् । अनेन महती प्रतिष्ठा खलु व्याकरणस्य विज्ञायते । निरुक्तकाराद् यास्कात् प्रागपि व्याकरणपरम्पराऽऽसीदिति सिद्धयति यास्कोक्त्या ।[३३]

**तस्मादकृतकं शास्त्रं स्मृतिं च सनिबन्धनाम् ।**

**आश्रित्यारभ्यते शिष्टै: शब्दानामनुशासनम् ।।वा.प. ४३**

एवम्प्रकारेण बहुभि: प्रमाणै: ज्ञायते यत् शास्त्रमिदं न केवलं साम्प्रतिकयुगे किन्तु अनादिकालादेव वेदस्य प्रमुखाङ्गत्वेन विराजते । अतोऽस्य नोत्पत्ति: जाता छन्दोवत् अस्य व्याकरणस्य अनादित्वम् अस्तीति बुधा: मन्यन्ते ।

## पदशास्त्रस्य वैशिष्ट्यम्

सर्वेषां मानवानां परस्परं व्यवहर्तुं साधनं भाषा । सा च द्विधा शाब्दिकी साङकेतिकी च । तत्र शब्दशास्त्रं वाक्यानां प्रयोगे, लेखने प्रबन्धनिर्माणे च नितरामपेक्षते । अन्यथा लिङ्वचनोच्चाराणादिषु दोषा:स्यु: । शब्दशास्त्रम्-व्याकरणशास्त्रम्-पदशास्त्रम्-लक्षणशास्त्रम्-करणशास्त्रम् सूत्रशास्त्रम् च सर्वं व्याकरणशास्त्रपर्यायभूतम् । शब्दसाधुत्वविषये यथोक्तं महामुनिना साधुत्वज्ञान विषया सैषा व्याकरणस्मृति: साधुशब्दानां ज्ञानं व्याकरणादेव भवति । व्याक्रियन्ते व्युत्पाद्यन्ते साधुशब्दा इति व्युत्पत्तिलाभात् । यथा - "एक: शब्द: सम्यग् ज्ञात: शास्त्रान्वित: सुष्ठु प्रयुक्त: स्वर्गे लोके कामधुग्धवति ।[३४]

अन्यच्च-

**उत त्व: पश्यन्न ददर्श वाचं उतत्व: श्रृण्वन्न श्रृणोत्येनाम् ।**

**उत त्वस्मै तन्वं विशस्रे जायेव पत्य उशती सुवासा: ।।**[३५]

**सक्तुमिव तितउना पुनन्तो यत्र धीरा मनसा वाचमक्रत ।**

**अत्रा सखाय: सख्यानि जानते भद्रैषां लक्ष्मी निहिताधिवाचि ।।**[३६]

अत: साधुशब्दज्ञानमूलकं व्याकरणम् । व्याकरणज्ञो नर: साधुशब्दप्रयोगे कुशलो भवति । सर्वैरेव ज्ञायते यद् चत्वरो वेदाः सर्वज्ञानराशिः यथोक्तम्-

**सर्वेषां तु स नामानि कर्माणि च पृथक् पृथक् ।**

**वेद शब्देभ्य एवादौ पृथक् संस्थाश्च निर्ममे ।।**[३७]

वेदविहित अपरापरा साङ्गसरहस्ययोःपरिशीलनादेव समायाति । उक्तञ्च-शिक्षाकल्पव्याकरण-निरुक्तच्छन्दोज्योतींषि इति षडङ्गो वेदोऽध्येयो ज्ञेयश्चेति प्रधानञ्च षट्स्वङ्गेषु व्याकरणमेव भवति । छान्दोग्योपनिषदि 'वेदानां वेद' इत्युक्त्वा व्याकरणस्य मुख्यत्वं निर्णीतम् । व्याकरणस्य महत्त्वं प्रतिपादयत भर्तृहरिणा न्यगादीत्थम्-

**आसन्नं ब्रह्मणस्तस्य तपसामुत्तमं तप: ।**

**प्रथमं छन्दसामङ्गं प्राहु: व्याकरणं बुधा: ।।**[३८]

लक्ष्यलक्षणाख्यं व्याकरणम्,लक्ष्यं प्रकृतिप्रत्ययात्मकं पदम्, लक्षणन्तु सूत्रम् । यथा-'पाक:' इति पदे पच्धातो: भावे इत्यर्थे घञ् प्रत्ययो वर्तते । उभयोर्योगे पाकरिति सिद्ध्यति ।

अथ लक्षणं भावल्युडन्त लक्षणशब्देन सूत्रमवगम्यते । अत एव लक्ष्यलक्षणयोर्यत्समुदितं व्याकरणं निगद्यते । यथाऽऽह पतञ्जलि:-"लक्ष्यलक्षणे व्याकरणम्"[३९] लक्ष्यञ्च लक्षणं चैतत् समुदितं व्याकरणं भवति ।'शब्दकारणमर्थस्य' इति वचनेनार्थबोधाय शब्दानां प्रवृत्ति: । अर्थबोधस्य कारणं शब्द एव । भाष्यकारोऽपि जगाद-अर्थनिमित्तक एव शब्द: । इत्थं च यथार्थावबोधस्य कारणं साधुशब्द एव । साधुशब्दज्ञानस्य कारणं व्याकरणं भवति । व्याकरणं विना शब्दानां तत्त्वावबोधस्यानुपपत्ते: । यथोक्तं हरिणा-

**अर्थप्रवृत्तितत्त्वानां शब्दा एव निबन्धनम् ।**

**तत्त्वावबोध: शब्दानां नास्ति व्याकरणादृते ।**[४०]

वैयाकरणा एव इन्द्रशत्रुर्वर्धस्व इत्यत्र समासस्वरं निश्चेतुं पारयन्ति । अत एव व्याकरणस्य पञ्चविधेषु प्रयोजनेष्वन्यतमं प्रयोजनं रक्षेति स्वीक्रियते ।

**रक्षोहागमलध्वसन्देहा: प्रयोजनम् ।**[४१]

रक्षार्थं वेदानामध्येयं व्याकरणम् । यो हि व्याकरणं जानाति स एव शास्त्रान्तरं विज्ञातुं शक्नोति । यो व्याकरणं न वेत्ति स कथमपि शास्त्रान्तरेषु प्रवेष्टुं न शक्नोति । शब्दस्य शास्त्रान्तरस्य रहस्यं ज्ञातुं प्रभवति । यथा आह-"यो वेदवयनं सदनं हि सम्यग् ब्राह्मं य: स वेदमपिवेद किमन्यथायस्मादत: प्रथममेतदधीत्य धीमान्शास्त्रान्तरस्य भवति श्रवणेऽधिकारी ।"[४२]वैयाकरण एव श्वजन:-स्वजन: सकलम्-शकलम् सकृत्-शकृत्, इत्येतेषां शब्दानामर्थभेदकं ज्ञातुं शक्नोति । यथाह-

**यद्यपि बहुनाऽधीषे तथापि पठ पुत्र व्याकरणम् ।**

**स्वजन: श्वजनो मा भूत् सकल: शकल: सकृच्छकृत् ।।**[४३]

शरीरे वातपित्तकफमलानां वैषम्ये ज्वरादिरोगसामर्थ्यम्, औषधादिषु च दोषनिवृत्ति-सामर्थ्यं विज्ञाय परेषामुपदेशाय चिकित्साशास्त्रं निबद्धं यथा, यथा चान्त:करणे रागेर्ष्याद्वेषादिदोषाणां कालुष्यक्लेशसामर्थ्यं, शमदमोपरतितितीक्षा वैराग्यादीनाञ्च दोषापशम-सामर्थ्यं विज्ञाय तदुपदेशाय वेदान्तध्यात्मशास्त्रं निबद्धम्, तथैव वाङ्मलानां भ्रष्टसंस्कारासाधूनां शब्दानाम् अशुद्धिदोषाणां पापसामर्थ्यम्, साधूनाञ्च पुण्यसामर्थ्यंविज्ञाय साध्व-साधुविवेकज्ञा-नार्थम् उपसर्गापवादलक्षणं व्याकरणशास्त्रं भगवता कारुणिकेन पाणिनिना निबद्धम् । एवञ्च यथा चिकित्साशास्त्रस्य रोगनिवृत्त्या कायशुद्धि: प्रयोजनम्, तथा व्याकरणशास्त्रस्यापभ्रंशदोषनिवृत्त्या अन्त:करणशुद्धि: प्रयोजनम्, तथा व्याकरणशास्त्रस्यापभ्रंश-दोषनिवृत्त्या शब्दसाधुत्वज्ञानं साक्षात् प्रयोजनं पर्यवस्यति । तदाह हरि: -

**कायवाग्बुद्धिविषया ये मला समवस्थिता: ।**

**चिकित्सालक्षणाध्यात्मशास्त्रैस्तेषां विशुद्धय: ।।**[४४]

अत्र लक्षणं नाम व्याकरणशास्त्रम्, 'इको यणचि'-इत्यादिसामान्यविशेष-लक्षणरूपव्याकरणेन वाङ्मलापनयनजन्या विशुद्धिर्वाचो भवतीति यावत् ।

पुरस्तात् परिदृश्यमानोऽपि पदार्थस्तावन्न परिज्ञायते, यावत्तस्य वाचक: सञ्ज्ञाशब्द: केनापि विशेषज्ञेन न बोद्ध्यते । बोधितेत सञ्ज्ञाशब्दे तदर्थस्य विविक्तं स्वरूपं सम्यक् निश्चीयते-'तदिदं वस्तु' इति । अत एव तत्र भगवत: आचार्यस्य पाणिनेरिदमादिमं सूत्रम् - 'वृद्धिरादैच्' इति । अथ च, सङ्गीतशास्त्रमध्यापयन् कुशलो गाथक: षड्ज-मध्यम-धैवतादि-सप्तस्वराणां दुरवधारं स्वरूपम्, तेषाञ्च मात्राविशेषं तालं वा सङ्गीतशास्त्रसङ्केतितेन शब्देनैव वेणु-वीणा-मृदङ्ग-मुरजादिलयै: प्रबोधयति शिक्षमाणान् । सञ्ज्ञाशब्दे प्रत्यभिज्ञाते सत्येव प्रत्यभिजानाति तत्र भगवान् रामचन्द्र:-'सोऽयमात्मजो रघुवंशमणिर्लवोऽयं कुशो वेति',

परिचिनोति च सम्राट् दुष्यन्त:-भारतसौभाग्यभालो 'भरतोऽयमि'ति। पांसुलपादो गोपालको हालिको वाहीको वा गोबलीवर्दादींश्चारयन् नयन्नानयन् रथे वहन् वा डित्था-डवित्थेत्यादिसञ्ज्ञाभि: सम्बोधयन् प्रवर्तयति निवर्तयति वा य: कश्चनार्थविशेष: प्रत्यक्षेणानुमानेन वा बोधविषयो भवति, स सर्व: शब्दानुविद्धः शब्दात्मकस्वरूप एव निर्धारितो भवति। प्रवृत्तिनिवृत्तिरूपसर्वव्यवहारस्य विश्वजनीनस्य शब्दाधीनत्वमेव। अद्यत्वे तु सप्तद्वीपा वसुमतीयं दूरसञ्चारसाधनैराकाशवा-ण्यादिभि: साक्षादेव सम्पर्कसूत्रे सुग्रथितेति शब्दस्य विश्वव्यवहारनिबन्धनत्वे कस्यापि क्वापि न संशीति:। श्रूयते हि 'ब्राह्मणेन निष्कारणो धर्म: षडङ्गो वेदोऽध्येयो ज्ञेयश्च' इति। निष्कारणो हि दृष्टकारणनिरपेक्षो नित्य इति यावत्। कार्यतेऽनुष्ठाप्यतेऽनेनेति कारणं फलम्। ब्राह्मणेन षडङ्गो वेदोऽध्येयो ज्ञेयश्चेत्यन्वय:। तथा च साङ्गवेदाध्ययनतदर्थज्ञानरूपोऽयं धर्मो नित्य: सन्ध्योपासनवदित्यर्थ:। व्याकरणस्य वेदाङ्गत्वं चाङ्गत्वेन संस्तवादुपकारकत्वाद् वा। इदं हि अर्थविशेषमाश्रित्य स्वरविशेषादीन् विदधत् पदपदार्थविशेषनिर्णये समुपयुज्यते। मन्वादिस्मृतिष्वपि अङ्गाध्ययनविधि: प्रसिद्ध्यति। स्मृत्यनुरोधाच्च ब्राह्मणपदं त्रैवर्णिकोप-लक्षणमिति बोद्ध्यम्। तथा च सन्ध्योपासनादिवत्साङ्गवेदाध्ययनतदर्थज्ञान-रूपोऽयं धर्मो नित्य:, इति नित्यस्याकरणे प्रत्यवायस्तत्करणे च तदभाव:, तथा व्याकरणाध्ययनस्या-ननुष्ठानेऽनुष्ठाने च बोद्ध्यं भवति। तदेवं व्याकरणध्ययनस्य नित्यकर्मत्वात्, नित्यकर्मणश्च सर्वत्र व्यवहार्यमाणत्वाद् व्यावहारिकत्वमपि नित्यं व्याकरणस्याऽऽयाति।

व्याकरणञ्च साधुशब्दानामन्वाख्यायकम् साधूनामिदमन्वाख्यानमिति भाष्योक्ते:, मृजिप्रसङ्गे मार्जि: साधुर्भवतीत्यादिभाष्याच्च 'साधुत्वज्ञानविषया सैषा व्याकरणस्मृति'रिति हरिणोक्तत्वाच्च। साधुत्वञ्च वैयाकरणमते पुण्यजनकत्वम् - एक: शब्द: सम्यग् ज्ञात: सुप्रयुक्त: स्वर्गे लोके च कामधुग् भवतीति श्रुते:, 'क्रतुविषये नानृतं वदेदिति श्रुतौ अनृतपदेनार्थानृतशब्दानृतयोरुभयोरपि ग्रहणस्य मीमांसायां निर्णीततया शब्दानृतत्वस्य पुण्यजनकत्त्वरूपत्वाच्च। तादृशशब्दानुशासनत्वादस्य स्मृतिशब्द: कर्मसाधन:, स्मर्यते इति स्मृति:। तथा च स्मृतित्वं स्मरणविषयत्वरूपं, तच्च प्रतिपाद्ये धर्माऽधर्मादावस्ति, न तु तत्प्रतिपादके शब्दसन्दर्भरूपग्रन्थे। किन्तु विषयगतस्मृतित्वस्य ग्रन्थे आरोपेण मन्वादिकृत-ग्रन्थेष्वपि स्मृतिव्यवहार:। यद्वा स्मृतिशब्द: करणसाधन:, स्मर्यन्ते ज्ञायन्ते धर्माधर्मादयो लोकतो दुरवधारविषया यया सा स्मृतिरिति। तथा च श्रुतिप्रतिपादितो लोकतो दुरवधारधर्माधर्मादिबोधको राजवंशवर्णनादिरहितो मुनिप्रणीतग्रन्थ: स्मृतिरुच्यते।पाणिनीय-मपि वैयाकरण-सिद्धान्तानुसारेण पुण्यजनकत्वरूपसाधुत्ववतां शब्दानामुपदेशकतया स्मृतिपदवी-मारोहति। व्यवहारे च तदेव प्रसिद्ध्यति, यस्य प्रामाण्यं नि:सन्दिग्धं भवति।'वेदा: प्रमाणमितिवद् वेदमूलकत्वात्स्मृतेरपि प्रामाण्यं सम्मतम्। साधुशब्दानां धर्मसाधुत्वव्यवस्थायै तद्बोधकपाणिनीयव्याकरण-स्याविच्छिन्नशिष्टसदाचारानुमितपूर्व- स्मृतिमूलत्वेन प्रामाण्यमुपपन्नम्।

अत्रेदं बोद्ध्यम्-शब्दधर्मिकसाधुत्वप्रकारकज्ञानकरणमिदं शब्दानुशासनं नाम व्याकरणस्मृति:। असाधुभ्यो विविच्य साधुशब्दनिर्वचनमस्या: प्रतिपाद्यो विषय:। सा चैषा प्रवाहनित्या अविच्छिन्नस्वरूपा।

पूर्वपूर्वशिष्टानां काले काले विच्छेदेऽपि तेषां व्याकरणानां 'शिष्टानामविच्छिन्नसाधुशब्दसमुदाचारदर्शनेन' स्मृत्वा यथोत्तरं लक्ष्यैकचक्षुष्कैः प्रतिभान-वद्भिरिन्द्रचन्द्रस्फोटायनप्रभृतिभिराचार्यैः यथाकालं विरच्यमानं तत्तद् व्याकरणं स्मृतिरूपमेवेति व्याकरणस्वरूपस्य न जातु विच्छेदः । यथा भक्ष्याभक्ष्यगम्यागम्यादिविधिनिषे-धविषयाः स्मृतयोऽनादिपरम्परातः सन्त्युपनिबद्धाः, तथा वाच्यावाच्यसाध्वसाधुशासनविषयेयं व्याकरणस्मृ-तिरपि । पूर्वपूर्वाचार्यैः निबद्ध्यमानं यद् व्याकरणं तदपि श्रुतिषु सिद्धान् शिष्टसमुदाचारप्राप्तान् साधुशब्दानालक्ष्य वेदवेदाङ्गतात्पर्यप्रकाशनाय शब्दतदर्थसाधुत्व-निर्वचनपरं वेदमूलं स्मरणमेव नापूर्वं कल्पितम् । इत्थं हि व्याकरणस्य स्मृतित्वाद् व्यावहारि-कत्वं तस्योपपन्नम् । कः शब्दः पुण्यजनकः, को वा नेति लोकतोऽवधारयितुमशक्यस्य व्याकरणस्मृतिद्वारैव ज्ञात्वाऽस्माभिः व्यवह्रियते । कात्यायनमुनिनापि स्पष्टमुक्तम् - 'लोकतोऽर्थप्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्मनियमः'(भा.वा.) इति । भगवतः पाणिनेर्व्याकरणशास्त्रप्रणयनप्रवृत्तिरपि शब्दानां पुण्यजनकत्वरूपसाधुत्वज्ञापनायैव, न तु शक्तिज्ञापनाय ।'लः कर्मणि०' इत्यादावर्थनिर्देशस्तु लादीनां कर्माद्यर्थपरत्वे एव साधुत्वमिति बोधनायेति ज्ञेयम् ।

वराटिकान्वेषणाय प्रवृत्तश्चिन्तामणिं लब्धवानिति वाशिष्ठरामायणोक्ताभाण-कन्यायेन शब्दसाधुत्वविचाराय प्रवृत्तं व्याकरणं तु औपनिषदं ब्रह्म अपि प्रापयति । तदाह हरिः -

**तद्द्वारमपवर्गस्य वाङ्मलानां चिकित्सितम् ।**

**पवित्रं सर्वविद्यानामधिविद्यं प्रकाशते ।।**[45]

तद्व्याकरणम् अपवर्गस्य अज्ञानबन्धदुःखान्मोक्षस्य ब्रह्मसाक्षात्काररूपस्य द्वारम् अर्थात् साधनम् वर्त्तते। तथाहि व्याकरणेन साधुशब्दज्ञानपूर्वक-प्रयोगादभिव्यक्तधर्मविशेषेण शुद्धान्तःकरणो वैयाकरणो यथोत्तरमभ्या-सपरिपाकात् प्रथमं व्यञ्जकध्वनिधर्मवर्णपदवाक्याति-रिक्तां हृदिस्थां मध्यमां वाचं स्फोटाख्यामखण्डां साक्षात्करोति, ततस्तदस्याः प्रकृतिं नाभिदेशस्थां पश्यन्तीं प्रतिभारूपां संहृतक्रमरूपां वाचं साक्षात्करोति, ततश्च भावनाभ्यासदृढतरसंस्कारबलात् प्रत्यस्तमितवर्णादिक्रमोल्लेखां मूलचक्रस्थां परां वाचं पश्यन्ती परा हि सा । इत्यभियुक्तोक्तेः । एवञ्च सूक्ष्मसूक्ष्मतरसूक्ष्मतमक्रमेण वैयाकरणः वर्णादिक्रमोपसंहारेण ज्ञानरूपशब्दब्रह्मणः स्वात्मना सहाभेदज्ञानवान् शब्दपूर्वं योगं लभते । ततश्च ब्रह्मात्म्यैक्यज्ञानान्मोक्षः । तदाह -

'शब्दपूर्वेण ज्ञानेन लभते ज्ञानमीदृशम्'इति । तदेवं व्याकरणं हि मोक्षप्रदाय प्रवेशद्वारम् । वैयाकरणः साधु-शब्दराशेज्ञानपूर्वकप्रयोगेण शुद्धान्तः करणो व्याकरणेन द्वारेण मोक्षपदे सुखं प्रविशतीत्याशयः । किञ्च मोक्षप्राप्तेः सोपानस्य विद्याश्रेण्याः प्रथमपदन्यासभूमिः राजमार्गश्च व्यारकणम् । तदुक्तं हरिणा -

 ISSN – 2349-3100

**इदमाद्यं पदस्थानं सिद्धिसोपानपर्वणाम् ।**

**इयं सा मोक्षमाणनामजिह्मा राजपद्धतिः ।।**[46]

तथाहि मोक्षमारुरुक्षोः मुनेः मोक्षस्य सोपानपरम्पराया विद्याश्रेण्या यानि पर्वाणि चतुर्दशविद्याविभागाः सन्ति, तेषु मूलभूतं प्रथमं पदन्यासस्थानमिदं व्याकरणप्रस्थानम्, सर्वासां विद्यानां साधुशब्दोपगृहीतत्वात् । शब्दशास्त्रं गृहीत्वैव शब्दविग्रहाणामुत्तरोत्तरविद्याशृङ्खलानां सुखेन ज्ञानप्राप्तेः सुकरत्वात् । किञ्चेयं हि शब्दविद्या मुमुक्षूणां कृतेऽविनाभूतोऽकण्टकः सुगमः सरलो राजमार्गः सर्वासु विद्यासु राजमाना मोक्षस्यानपेक्षं साक्षात् साधनम् । तदाह -

**शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति ।**[४७] इति

तदेवं पुरुषार्थचतुष्टयेषु सर्वोत्कृष्टस्य मोक्षाख्यपुरुषार्थस्याऽवाप्तयेऽपि व्याकरणस्य साक्षात् साधनत्वेन महत्त्वं वरीवर्त्ति ।तदित्थं व्याकरणस्य पारमार्थिकत्वं निरूप्य सम्प्रति व्याकरणस्य साक्षातुपयोगाः केचन प्रदर्श्यन्ते, येषु व्याकरणमुज्झित्वा विकल्पावसरो नास्त्येव । याज्ञिकाः पठन्ति -

‘दशम्युत्तरकालं पुत्रस्य जातस्य नाम विदध्यात्, घोषवदाद्यन्तरन्तःस्थमवृद्धं त्रिपुरुषानूकमनरि-प्रति-ष्ठितम् ।

**सन्दर्भाः**


१.वाक्यपदीये ब्रह्मकाण्डे श्लोकसं.- ११ ।

२.वाक्यपदीये ब्रह्मकाण्डे श्लोकसं. - १४ ।

३.वाक्यपदीये ब्रह्मकाण्डे श्लोकसं. - १६ ।

४.महाभाष्यवार्तिकं १ पस्पशाह्निके ।

५.गोपथब्राह्मणे १/१/२४ ।

६.गोपथब्राह्मणे १/१/२७ ।

७.वाक्यपदीये वाक्यकाण्डे ३४२ ।

८.यज्ञ कस्मात्? प्रख्यातं यजति कर्मेति नैरूक्ताः । निरुक्ते ३/१९ ।
यजयाचयतविच्छवप्रच्छरक्षो नङ् । अष्टा. ३ ।३ ।९०

९.सह्धातोः ‘असुन्’ (दश. उ. ९ ।४९ पं. उ. ४ ।१९०)

१०.अश्विनौ यद् व्यश्नुवाते सर्वम् । निरुक्तम् १२/१ ।

११.धिनोतेर्धन्यम् । महाभाष्यम् ५/२/४ ।

१२.केतोपपदात् पुनातेः ‘क्विप् च’ अष्टा० (३/२/७६) इति क्विप् ।

१३.पवित्रं पुनातेः । निरुक्त ५/६ पुनातेः ष्ट्रन् । द्र. अष्टा० ३/२/१८५, १८६ ।

१४.पाततुदिनचिरिचिसिचिभ्यस्थक् । पंच० उणादि २/७ ।

१५.नद्य कस्मान्नदना इमा भवन्ति शब्दवत्य । निरुक्ते २/२४ ।

१६.आप आप्नोतेः । निरुक्त ९/२६ आप्नोतेह्रस्वश्च । पं. उ. २/५९ ।

१७.ऋग् ४/५८/३ ।

 ISSN – 2349-3100


१८.ऋग् १/१६४/४५ ।
१९.ऋग् १०/७१/४ ।
२०.ऋग् १०/७१/२ ।
२१.ऋग् ८/६९/१२ ।
२२.दृष्ट्वा रूपे व्याकरोत् सत्यानृते प्रजापतिः ।
२३.वाजिनीऽवती । ऋ. पदपाठ १/३/१० आस्तृऽभि । ऋग्. पदपाठ १/८/४
महित्वम् ऋक् पदपाठ १/८/५ ।
२४.सम्ऽजग्मानः । ऋक्पदपाठे १/६/७ प्रऽतिरन्ते ऋक्. पदपाठे १/११३
प्रतिऽह्यते । ऋक् पदपाठः ४/४३/२ ।
२५.रूद्रवर्तनी इति रूद्र अवर्तनी । ऋक्पद १/३/३ ।
२६.नूनं व्याकरणं कृत्स्नमनेनबहुधा श्रुतम् । बहु व्याहरतानेन न किञ्चिदपभाषितम् । किष्किन्धा ३/२९ ।
२७.पुराकल्पे संस्कारोत्तरकालं ब्राह्मणा व्याकरणं स्माधीयते महाभाष्ये अ.१,पाद १, आह्निके १ ।
२८.लघुशब्देन्दुशेखरे अइउण सूत्रव्याख्याने ।
२९.महाभाष्ये पस्पशाह्निके, ऋक्न्ते च (१/४) ।
३०.श्रीवरवविधि वैष्णवग्रन्थे, व्याकरणशास्त्रेतिहास पृष्ठ.७५ ।
३१.गीतासार २०,५५,५७ हस्तलेख सं.१६४, सन १८८३-८४ ।
३२.जयद्रथविरचित हरचिन्तामणौ शब्दशास्त्रावतारे सप्तविंशप्रकाशे ३३-१६७ ।
३३.निरुक्तम्-१३/१/७ ।
३४.महाभाष्ये पस्पशाहिनके पृष्ठ-६ ।
३५.यास्ककृत निरुक्त ११/१८ तथा ऋ.सं.१०/७१/७ ।
३६.ऋ.सं.१०/७१/२ यास्ककृत निरुक्ते ४/११ ।
३७.मनुस्मृतौ अध्याय । श्लोके २१ ।
३८.वाक्यपदीये ब्रह्मकाण्डे श्लोक ११ पृ.२० ।
३९.पातञ्जलमहाभाष्ये प्रथमाह्निकम् ।
४०.वाक्यपदीयम् ब्रह्मकाण्डम् श्लोक १३ पृष्ठ २३ ।
४१.व्याकरणमहाभाष्ये प्रथमाह्निके ।
४२.भास्कराचार्यस्यसिद्धान्त शिरोमणौ गो.अ.गो.प्र.श्लोके ८ पृ.१४६ ।
४३.प्रकीर्णोऽयं श्लोकः ।
४४.वाक्यपदीयम् ब्रह्मकाण्डे श्लोके १४८ ।
४५.वाक्यपदीयम् १/१४
४६.वाक्यपदीयम् 1/16
४७.ब्रह्मबिन्दूपनिषदि ।


आचार्य, कामेश्वर सिंह संस्कृत विश्वद्यालय दरभंगा

 ISSN – 2349-3100

# नागेश्वरज्योतिर्लिङ्गस्य निरूपणम्

✍आचार्य नीलाम्बर चौधरी

### 3.2.1 भौगोलिकदृष्ट्या निरूपणम्

नागेश्वरज्योतिर्लिङ्गं गुजरातराज्यस्य २२.२३इतिउत्तराक्षांशे ६८.९७ इति पूर्वाक्षांशे द्वारिकाजनपदे समवस्थितमस्ति।[1] स्थानमिदं ओखारेलस्थानात् बेटद्वारिकास्थानात् दशकोलोमीटरदूरमस्ति। सौराष्ट्रस्य पश्चिमसमुद्रतटे आद्यनादिसिद्धादारुकायाः वनप्रदेशोऽयं, यस्य साम्प्रतिकाभिधानं द्वारिकाक्षेत्रमस्ति, पौराणिककालादेव अरबसगरतट-स्थित्वात्क्षेत्रमिदं द्वारवीतिनाम्ना ज्ञायते।[2] समग्रक्षेत्रमिदं भौगोलिकदृष्ट्या अतीवमकत्त्वपूर्णमस्ति। इदं प्रतीचिभारतस्य केन्द्रमस्ति। पर्यटनदृष्ट्या इदम्भारतस्य अतीवमहत्त्वपूर्णकेन्द्रमस्ति।

### 3.2.2 ऐतिहासिकदृष्ट्या निरूपणम्

प्राचीनतकालात् नागेश्वरज्योतिर्लिङ्गमिदं गुहमन्दिररूपेणावस्थितमासीत् किन्तु त्रिंशद्वर्षेभ्यः त्रिदशकात् पूर्वं वर्तमाननवीनमन्दिरस्य निर्माणमभवत्।[3] प्राचीनकालादेव ज्योतिर्लिङ्गमिदं समग्रविश्वेऽस्मिन् प्रसिद्धमस्ति। **शिवपुराणानुसारं**[4] दारुका नाम्नी राक्षसी एका आसीत्। या पार्वत्याः वरं प्राप्य मदोन्मत्ता आसीत्। तस्याः पतिः दारुकः महाबलवान् आसीत्। सः बहुराक्षसैस्सह समाजे आतङ्कमयवातावरणं प्रसृतवान्।स यज्ञादिशुभकर्म

## 3.2 नागेश्वरज्योतिर्लिङ्गस्य निरूपणम्

### 3.2.1 भौगोलिकदृष्ट्या निरूपणम्

नागेश्वरज्योतिर्लिङ्गं गुजरातराज्यस्य २२.२३इतिउत्तराक्षांशे ६८.९७ इति पूर्वाक्षांशे द्वारिकाजनपदे समवस्थितमस्ति।[1] स्थानमिदं ओखारेलस्थानात् बेटद्वारिकास्थानात् दशकोलोमीटरदूरमस्ति। सौराष्ट्रस्य पश्चिमसमुद्रतटे आद्यनादिसिद्धादारुकायाः वनप्रदेशोऽयं, यस्य साम्प्रतिकाभिधानं द्वारिकाक्षेत्रमस्ति, पौराणिककालादेव अरबसगरतट-स्थित्वात्क्षेत्रमिदं द्वारवीतिनाम्ना ज्ञायते।[2] समग्रक्षेत्रमिदं भौगोलिकदृष्ट्या अतीवमकत्त्वपूर्णमस्ति। इदं प्रतीचिभारतस्य केन्द्रमस्ति। पर्यटनदृष्ट्या इदम्भारतस्य अतीवमहत्त्वपूर्णकेन्द्रमस्ति।

### 3.2.2 ऐतिहासिकदृष्ट्या निरूपणम्

प्राचीनतकालात् नागेश्वरज्योतिर्लिङ्गमिदं गुहमन्दिररूपेणावस्थितमासीत् किन्तु त्रिंशद्वर्षेभ्यः त्रिदशकात् पूर्वं वर्तमाननवीनमन्दिरस्य निर्माणमभवत्।[3] प्राचीनकालादेव ज्योतिर्लिङ्गमिदं समग्रविश्वेऽस्मिन् प्रसिद्धमस्ति। **शिवपुराणानुसारं**[4] दारुका नाम्नी राक्षसी एका आसीत्। या पार्वत्याः वरं प्राप्य मदोन्मत्ता आसीत्। तस्याः पतिः दारुकः महाबलवान् आसीत्। सः बहुराक्षसैस्सह समाजे आतङ्कमयवातावरणं प्रसृतवान्।स यज्ञादिशुभकर्माणि

 ISSN – 2349-3100

विध्वंसयन् सन्तमहात्मादीन् संहरति स्म। पश्चिमसमुद्रतटे सर्वविधसम्पदापूर्णं षोडशयोजनात्मकन्तस्य वनमेकमासीत्। यत्र स उवास। दारुक यत्र याति स्म तत्र सा स्वविलासार्थं वृक्षान् विविधोपकरणसुसज्जितवनभूमिञ्च नयति स्म। भगवती पार्वती तस्य वनस्य सरक्षणदायित्वं दारुकाय एव ददौ। यत्खलु तस्याः वरप्रसादात् तस्य पार्श्वे एव तिष्ठति स्म। एकदा तस्मिन् समुद्रे मनुष्यपूर्णाः बहवः नावः गच्छन्तः आसन्, यान् कतिपयराक्षसाः अपहृतवन्तः, ततस्ते तान् यात्रिणः निबडीकृत्य कारागारे न्यक्षिपन् अपि च ते विविधयातनाभिः प्रताडितवन्तः। एकः सुप्रियनायकः यः खलु वैश्यः स तस्य यात्रिदलस्य अग्रणीः नेता आसीत्। यः अतिसदाचारी आसीत्। स ललाटे भस्मं विलेप्य कण्ठे रुद्राक्षमालां धृत्वा भगवन्तं शिवं भजते स्म। तस्य सर्वे सहयात्रिणः नमः शिवाय इति मन्त्रं जपन्ति स्म। वृत्तान्तमिदं विज्ञाय दारुकः पुनस्तान् प्रताडितवन्तः। राक्षसः सुप्रियवधाय धावितवन्तः। स भयभीतो भूत्वा आत्मत्राराणार्थमं शिवं प्रार्थयामास। तस्य प्रार्थनामाकर्ण्य भगवान् शिवः विवरात् प्रकटयामास। तेन सह चतुर्द्वारयुक्तं देवनिकेतनमेकमपि प्रकटितम्। तस्य मन्दिरस्य मध्यभागे गर्भगृहे ज्योतिर्लिङ्गं प्रकाशितम्भवति स्म तथा च लिङ्गेन साकं शिवपरिवारस्य सर्वे सदस्याः अपि तत्र विलसन्ति स्म। वैश्यसुप्रियः शिवपरिवारसहितज्योतिर्लिङ्गस्य दर्शनं पूजनञ्चाकरोत्। सुप्रियस्य आराधनया प्रसन्नः भगवान् आशुतोषः पाशुपतास्त्रेण प्रमुखराक्षसान् तदीयानुचरान् अपि च तत्समग्रसंसाधनानि नष्टानि। इत्थं शिवभक्तानां प्रियज्योतिलिङ्गस्वरूपभगवान् शिवः नागेश्वरमिति कथितम्। शिवा पार्वत्यपि नागेश्वरीत्यभिधया विख्याता जाता। इत्थं शिवः ज्योतिर्लिङ्गरूपेण प्रकटितः। यः त्रिविधलोकानां कामनां प्रपूर्यते। यः कोऽपि अस्य नागेश्वरमाहादेवस्य आर्विभावकथां सश्रद्धं

सप्रेमपूर्वकञ्च श्रृणोति तस्य समस्तं पापं विनश्यति। स समग्राभीष्टफलमधिगच्छति।

### 3.2.3 तन्त्रशास्त्रदृष्ट्या वास्तुशास्त्रीयविश्लेषणम्

कृतजीर्णोद्धारनागेश्वरज्योतिर्लिङ्गस्य अद्भुतस्वरूपं दूरादेवाकर्षयति। मन्दिरं परितः सघनविपनानामभावत् पञ्चकीलोमीटरदूरादेव, अस्य मन्दिरस्य दर्शनमुपलभ्यते।[5] मन्दिरस्य शिखरम् अतीवोर्ध्वत्वात् समीपस्थक्षेत्रस्य समतलत्वात् मन्दिरस्य भव्यस्वरूपं परितः दृश्यते। नागेश्वरज्योतिर्लिङ्गस्य क्रोशत्रये मन्दिराणाम्बाहुल्यमस्ति। भिन्नभिन्नदेवीदेवतानां स्वरूपाणि मनः रञ्जयति, मन्त्रमुग्धं करोति। पूर्वभागे बेटमूलद्वारिका अस्ति, उत्तरभागे द्वारिकपुरिमन्दिरं दर्शनीयमस्ति। मन्दिरप्राङ्गणं विशाल परकोट्या परिवृता अस्ति। मन्दिरप्राङ्गणेऽपि नानदेवीदेवतानां मन्दिराणि सन्ति। प्रथमतलमन्दिरमिदं द्विशतफीटपरिमितोन्नतमस्ति। अष्टकोणाकारस्य[6] अस्य गर्भगृहस्य बाह्यमान्तरिकस्वरूपञ्च तन्त्रकलायाः वास्तुशास्त्रीयतत्वानां प्रच्छन्नरहस्यमुद्घाटयति। अष्टकोणचक्रं द्विव्यचक्ररूपे संसारे विख्यातमस्ति यतः अस्य रूपमलौकिकमस्ति। अष्टकोणचक्रस्य कान्तिः पद्मरागमणिरिव रक्तवर्णीया अस्ति। पद्मरागःमणिविशेषोऽस्ति। अष्टकोणचक्रस्य कान्तिः पद्ममिव रक्तिमा अस्ति। अष्टकोणचक्रस्थवाशिन्याद्यष्ट श्रीचक्रनिरूपे एवं अभिव्यक्तम्। वाशिनी नाम्नी वागदेवताम्बा, वाङ्निलयस्य अधिष्ठात्री देव कामेश्वरी अस्ति, तथैव मोहिनी तद्वदेव विमला, अरुणा नाम्नी वागदेवताम्बाअपि चजायिनी नाम्नी वाग्देवताम्बा सर्वेश्वरी तत्कुलिनी, इत्येतासां सदा पूजा भवति।[7]

 ISSN – 2349-3100

गर्भगृहे पीठिकायाः अद्भुतस्वरूपं दृश्यते। षट्कोणाकारकेऽस्मिन्[8] गर्भगृहे पाषाणपीठिका निर्मिता अस्ति। यस्यामुपरि रजतलेपः अस्ति / रजताच्छादनमस्ति। अस्यां स्वरूपमवलोक्य दिव्यानुभूतिर्भवति। वास्तुगन्थेषु तन्त्रग्रन्थेषु अपि च शिवालयेषु नानाविधयोग्यायोग्यपीठिकाः आसन्। पीण्डिकानामथवा जलधारिणां वर्णनमभवत्। पीठिका सामन्यतया उमाबोधिका अपि च लिङ्गं सामान्यतः महेश्वरबोधकमस्ति। ग्रन्थाकारः पीठयोग्यं द्रव्यम्, सामग्री, पीठस्य नानाकृतिः, नाम, तस्याः प्रमाणम्, भद्रपीठम्, पद्मम्, वज्रम्, महाब्जम्, श्रीकरः, पीठपद्मम्, महावज्रम्, सौम्यपीठम्, श्रीकाम्यम्, पीठादयः इत्येतत् वर्णितमस्ति। एतदतिरिच्य ब्रह्मशिला, कूर्मशिला, प्रतिमायोग्यपीठम्, पीठानुसारं देवालयस्य मानम्, प्रतिमानुसारं प्रसादस्य प्रमाणम्, अष्टबन्धसङ्ग्रहः इत्यादिसर्वं विमृष्टमस्ति।[9] वर्णनमिदं मुख्यतया **शैवागमे[10], अपराजितपृच्छायां[11], देवतामूर्तिप्रकरणे[12], रूपमण्डने[13]** इत्यादिग्रन्थेषु विवृतमस्ति। सामन्यतया पीठस्य निमित्ताय एकजातीयद्रव्याणामुपादानमुचितमस्ति। अपराजितपृच्छानुसारं[14] धातुलिङ्गस्य मणिलिङ्गस्य कृते धातुपीठस्य निर्माणं भवेत्। लिङ्गपीठिकायाः कृते स्त्रीसञ्ज्ञकशिलायाः प्रयोग एव उचितः। शिवलिङ्गपुञ्जांशेन द्विगुणितप्रमाणेन निर्मितपीठिका हीनपीठिका कथ्यते। लिङ्गोदयसमाना उन्नतपीठं श्रेष्ठमिति मन्यते, यदुचितं प्रतीयते।

गर्भगृहस्य क्रमशः ५-३ पाद अष्टरेखाः संयोज्य अष्टकोणात्मकस्वरूपस्य निर्मितमस्ति। साक्षान्मध्ययोनिपीठिकायां[15] एकहस्तपरिमितं शिवलिङ्गमस्ति। यत्र चतुर्फीटपरिमितं पञ्चमुखनागः विद्यमानः अस्ति। शिवलिङ्गस्य साक्षात् सम्मुखे पार्वतीस्वरूपा भगवती नागेश्वरी विद्यमाना अस्ति। देवी त्रिपादपरिमितजगत्यां स्थिता अस्ति। गानेश्वरीदेव्याः प्रतिमा चतुपादन्नता अस्ति। सा प्रसन्नमुद्रायां स्वभक्तेभ्यः आशीर्वादं प्रयच्छति। मस्तिष्के मुकुटमपि हस्ते शङ्कचक्रं च विराजमानमस्ति, इयं पञ्चपादपरिमित काचस्य मण्डपे स्थिता अस्ति। नागेश्वरीमातुः वामभागे चतुर्फीटपरिमिता गङ्गामातुः प्रतिमा अस्ति। गर्भगृहं श्वेतकृष्णरक्तवर्णीय पाषाणखण्डद्वारा निर्मितः अस्ति अस्य आन्तरिकस्वरूपं स्वच्छः अस्ति। शिवलिङ्गस्य साक्षादुपरि रजतछत्रं विद्यमानमस्ति। नागेश्वरीमातुः वामभागे अखण्डदीपः प्रज्वलितो भवति। गर्भगृहे नागेश्वरीमातुः पार्श्वे नागदेवी देवता च वर्तते। यदुपासना अत्र क्रियते। अत्र एषामर्चनायाः विशिष्टमहत्वमस्ति यत्प्राचीनकालादेव आगच्छति। पूजायां प्रत्येकं दर्शनार्थी नागेश्वराय समर्पयति।गर्भगृहस्य साक्षात् सम्मुखे विशालमण्डपं संस्थितमस्ति।

मन्दिरमण्डपं ७०X६० उत्तरद्वारे तथा दक्षिणे द्वारस्य पार्श्वे दशपादपरिमितं वर्धित्वा अस्य परिमापः अशीतिपादपरिमिता भवति। मन्दिरस्य मण्डपमपि द्विधा विभक्तमस्ति। तच्च पूर्वोत्तरं पश्चिमोत्तरं चास्ति। पश्चिमोत्तरभागे गर्भगृहस्य समीपे पूजनसमये पण्डितसमवायः/पण्डितसम्मुखे) विद्यमानः अस्ति, पूर्वोत्तरभागे सभामण्डपमस्ति। मण्डपमिदं दर्शनार्थिनाङ्कृते व्यवस्थितमस्ति। पश्चिमोत्तरमण्डपं यस्याभिधानं गर्भगृहमण्डपमस्ति,[16] यत्खलु अतिविस्तृतं नास्ति। इदमपि द्विधाविभक्तमस्ति। प्रथमभागः 10x15 फीटपरिमितः तथा द्वितीयभागः 15x9 फीटपरिमितः, प्रथमभागे प्रवेशार्थमुभयतः सोपानव्यवस्था अस्ति, यत्त्रिफीटपरिमिताधोऽस्ति। तस्य परिमापः 3x6 अस्ति तथा द्वितीयमण्डपस्य मुख्यद्वारं षट्फीटपरिमितोन्नतमस्ति।

 ISSN – 2349-3100

द्वितीयमण्डपे प्रवेशानन्तरमेव गर्भगृहे प्रवेशः सम्भवति। अस्य मण्डपस्य उभयत्र 5x6 पादपरिमितद्वारमस्ति। इत्थमत्र गर्भगृहमण्डपस्य अद्‌भुत्स्वरूपम्प्राप्यते। अत्र मण्डपस्य आन्तरिकभागः लघुगृहनिर्मितः यत्खलु साधनास्थलमस्ति, इदमेव तादृशस्थलमस्ति यत्र गुह्यमन्त्राणां साधना क्रियते। इदं प्राचीनकालादेव विद्यमानमस्ति। आन्तरिकभागे तमः व्यापृतमस्ति। एतादृशमण्डपस्य निर्माणं सर्वेषां देवानां प्रसादस्य अग्रे विनिर्मीयते। गर्भगृहस्य अग्रभागे त्रीणि मण्डपानि क्रमशः गूढमण्डपम्, त्रिकमण्डपम्, नृत्यमण्डपम् च निर्मातव्यानि।[17] षोडशदलाकृतेः प्रतीकचिह्नं सावधानदर्शनेन प्राप्यते। यस्य पूजनं पुरातमकालादेव भवति। एवं मान्यता अस्ति स्वसम्मुखात् वामभागे क्रमशः कामाकर्षिणी, बुद्धयाकर्षिणी, अहङ्कारकर्षिणी, शब्दाकर्षिणी, स्पर्शाकर्षिणी, रूपाकर्षिणी, बीजाकर्षिणी, आत्माकर्षिणी, अमृताकर्षिणी, तथा शरीराकर्षिणी आसां षोडशनित्यशक्तीनां ध्यानपूर्वकं पूजनं करणीयम्।[18] अयं चन्द्र इव धवलः, षोडशदलयुक्तः, सर्वविधाशापूरकः, कमलाकारचन्द्र इव, दिव्यषोडशशुद्धसुन्दरदलैः संशोभितः, अमृतवृष्टिकरश्च भवति। इदं षोडशदलचक्रं पद्माकारमस्ति अपि च षोडशदलयुक्तमस्ति। अत्र चन्द्रस्य षोडशकलाः वर्तन्ते। अस्योपानया समस्ताशाः पूर्णाः भवन्ति। अत्र द्वारपालपूजनस्य विशिष्टविधानमस्ति। द्वारस्य दक्षिणभागे महालक्ष्म्याः दक्षिणभागे महासरस्वत्याः अर्चनां कृत्वा पुनः द्वारस्य दक्षिणभागे विघ्नगङ्गायाः तथा यमुनायाः सपर्यां कृत्वा वामभागे क्षेत्रपालस्वसमुद्रयमुनायाः पूजनं विधाय पुनः धातृविधात्र्योः, वामभागे निधिखपद्मयोः द्वारपालस्य च अर्चना कर्तव्या। **नन्दी, महाकालः, गणेशः, वृषभः, भृङ्गरिः, अभिधः, स्कन्दः, चण्डेश्वरचेत्येते पार्वतीशसदाशिवस्य द्वारपालाः सन्ति। येषामिहाचर्ना विधीयते।**[19]

मण्डपे एव हनुमतः गणेशस्य तथा शङ्करस्य प्रतिमा विद्यमना अस्ति। मण्डपस्योपरि 3x30 फीटपरिमितः स्तम्भः अस्ति। यः श्वेतपाषाणखण्डेन निर्मितः अस्ति। तथा उपरि कर्णिकायाः शिल्पकर्म अपि कृतमस्ति। स्तम्भस्योपरि भागः अर्धगोलाकारः अस्ति। सर्वेषां देवानां सर्वासां देवीनां सर्वेषां सेव्यस्वरूपाणाञ्च रक्षार्थं शिखरस्य रचना क्रियते। शास्त्रविदाम्मतानुसारं एषामभिधानं विमानमिति।[20] यस्य अद्स्वरूपमत्र दर्शने प्राप्यते। यत्रोपरि कलशमात्रमेवावलोक्यते। इत्थं विमानोपरि कलशः नान्यत्र अवलोक्यते। मण्डपस्य विमानं त्रिकोणाकारमस्ति[21] यत्रापि कलशाः बाहुल्येन वर्तन्ते शिखरस्य षोडशश्रृङ्गानि[22] सन्ति, तदुपरि कलशचित्रं निर्मितमस्ति एषां श्रृङ्गानामम्ध्ये मुख्यशिखरस्योपरि विशालकलशः विद्यमानः अस्ति तथा घण्टाचित्रम्मध्ये अवलोक्यते। यस्योरि पिहितकलममस्ति। कलशस्य पार्श्वे रक्तवर्णीया पताका स्थिता अस्ति।

मन्दिरप्राङ्गणे विशालं यज्ञमण्डपमस्ति। यत्र **त्रिकोणाकारिका** योन्यकारिका आयताकारिका अर्धचन्दिका च वेदी निर्मिता अस्ति। अत्र यज्ञानुष्ठानस्य परिपाटी /प्रथा प्रचलिता अस्ति। आगमरहस्यग्रन्थे योनिकुण्डनिर्माणस्य प्रकारः एवं बोधितः अस्ति वर्गाकारक्षेत्रस्य चतुर्विंशतिभागङ्कृत्वा तस्य पञ्चमांशमर्थात् पञ्चाङ्गुलं यवद्वयं यूकमेकं प्रमाणमग्रे समेधनीयम्।[23] अवशिष्टस्य चतुर्षु भागेषु विभक्तस्य क्षेत्रस्य पश्चिमचतुरस्रद्वयस्य मध्याङ्कात् कर्णसूत्रस्य चतुर्थांशात् उत्तरपश्चिमभागे अर्धचन्द्राकारवृत्तद्वयं संवर्धनीयम्। एवं यदि क्रियते यत् पूर्वे दक्षिणोत्तरसूत्रात् संलग्नवृत्तार्धं यावत् नीत्वा द्विगुणञ्च कृत्वात भगाकारस्य योनिकुण्डन्निर्मितम्भवति।[24] एवम्प्रकारेण शतांशयुक्तः

पञ्चमांशः तथा तस्य प्रमाणसूत्रात्, मध्यरेखातः वृतार्धं विरच्य तस्य अग्रपूर्वात् पश्चिमाजीवारूपरेखावृतार्धस्य सम्यग्रूपेण सिद्ध्यर्थं निर्मातव्यमिदं वृत्तार्धकुण्डमिति कथ्यते।[25]

त्रिकोणाकारकुण्डम्- क्षेत्रस्य तृतीयांशं पूर्वतः संस्थाप्य तस्य उभयावसाने चतुर्थांशमुपस्थाप्य एवमेव दक्षिणे उत्तरेऽपि कृत्वा त्रिषु चिह्नेषु सूत्रं सयोज्य रेखा करणीया एवम्प्रकारेण त्रिकोणकुण्डस्य निर्मितिः भवति।[26] अस्मिन्नेवागमरहस्ये चतुरस्रकुण्डनिर्माणपद्धतिरपि प्रतिपादिता अस्ति। चतुर्विंशतिसङ्ख्यां चतुर्विंशतिसङ्ख्यया गुणितङ्कृत्वा ५७६ इति गुणनफलं प्राप्यते, तदेव क्षेत्रफलमिति। इदमेव क्षेत्रफल-मष्टविधकुण्डानामवगन्तव्यम्। इदमेव क्षेत्रफलमाहोस्विद् चतुरस्रं समस्तकुण्डाना-म्प्रकृतिरस्ति। एतेन एकहस्तपरिमितलम्बं एकहस्तपरिमितवर्गाकारं एकहस्तपरिमित-गभीरकुण्डमेव निर्मितं तं चतुरस्रमिति कथ्यते।[27]

मन्दिरस्य प्राङ्गणे बृहती शिवमूर्तिरस्ति तथा लघुशिवमन्दिरमपि अस्ति यद्विशालपीपलवृक्षस्य अधः स्थितमस्ति। प्राङ्गणे अनेकानि लघुमन्दिराणि सन्ति। यथा हनुमन्मन्दिरम्, भैरवमन्दिरम्, गणेशमन्दिरम् एतेष्वन्तिमं नूतनमन्दिरमित्याकलयितुं शक्यते। मन्दिर परकोट्या साक्षात्पार्श्वे आवङ्घातायाः विशालमन्दिरमस्ति, यच्चत्वारिंशत्फीटपरिमितमस्ति यत्र बाहुल्येन देवीदेवताः विराजन्ते। यथा भगवान् शङ्करः, माता पार्वती, भगवान्, कृष्णः श्रीमद्धनुमानादि। मन्दिरस्य साक्षात्दक्षिणभागे देवीदेवतानां मूर्तयः विस्तृत आवृतः अस्ति। तथा तत्रैव कमलकुण्डं विद्यमानमस्ति। इत्थं नागेश्वरज्योतिर्लिङ्गस्य दृश्यं निश्चयेन भक्तानां मनांसि शान्तिं जनयति।

### 3.2.3.1 बेटद्वारिका

बेट इत्यस्यार्थो भवति द्विप इति। द्विपेऽवस्थितत्वात् बेटद्वारका इत्यभिधानमस्ति। गोमतीद्वारकायाः पूर्वोत्तरस्य समुद्रवंकस्थितोऽयं लघुद्वीपः।[28] बेटद्वारकास्थानं दक्षिणपश्चिमतः पूर्वोत्तरपर्यन्तं द्वादशकिलोमीटरपरिमितक्षेत्रे विस्तृतमस्ति।[29] वर्ष १६१६-१७तमे वर्षे द्वारकास्वरूपस्य आनयनं द्वारिकामन्दिरात् वेदद्वारकायां जातम् प्रसाद इव निर्मितमन्दिरे अन्यदेवैस्सह अस्य स्वरूपस्य अपि स्थापनं जातम्।[30] बेटद्वारिकायां द्वारकाधीशास्य समक्षं देवकीमातुः मन्दिरे देवक्या सह सत्यभामा लक्ष्मीशच विराजिता आसीत्।[31] किञ्चित्कालानन्तरमुभयोः पृथक् पृथक् मन्दिरं निर्माय तत्र स्थापना विहिता। एवः मन्दिरस्य विकासः जातः।[32] अशीत्युत्तरसप्तदशशततमे वर्षे सत्यभामलक्ष्म्योः पृथक्-२ मन्दिरनिर्माणमभवत्।[33] पञ्चाशदधिकाष्टादशशताब्द्यां मुख्यमन्दिरस्य पार्श्वे जम्बुवत्याः मन्दिरस्य निर्माणमभवत्।[33] प्रत्येकैकद्यश्यां भगवताः यात्रा जलक्रीडार्थमायोज्यते। यत्रायां उत्सवमूर्तिलघुगोपालस्य भव्यशिबिकायाम् उपवेशनं कारयित्वा/संस्थाप्य वैष्णवानां समूहेन सह बेटशङ्खोद्धारमार्गेन गम्यते। मुख्यमन्दिरे कृष्णसपर्यायार्थं महिषीद्वयं नियुक्तमस्ति। यत्र पर्यायत्वेन तयोः दायित्वमासीत्। प्रतिदिनं प्रातः मङ्गलारतिः रात्रौ च शयनारतिः क्रियते। ब्रिटिशपरिषद्सर्वकारः नवपञ्चाशदुत्तराष्टादशततमे वर्षे भारतीयसंस्कृतिधाम्नि आक्रमणं कृतवान्।[34] यस्योत्तरपक्षे ओखामण्डलस्य नरसिंहबाखेरः वीरतापूर्वकं अङ्ग्लीयजनान् पराजितवान् तथा बेटदुर्गं स्वाश्रयस्थानमकरोत् च। पुनः आङ्गलसेनापतिः डोनावतः तथा च स्कोबीमहोदयश्च पुनरेकवारं पदसेनाभिः नौकासेनाभिः सह द्वरकायामुपरि आक्रमणङ्कृतवान्। ततः स आंतभौममार्गेन बेटद्वारकामन्दिरस्य भागस्य ध्वसं

कृतवान्। एवम्प्रकारेण ध्वंसद्वारकायामेकादशदिनानि लुण्ठितवान्। चतुर्दशकोटिसम्पत्तिमपहृतवान्। बेटद्वरकायाः नूतनमन्दिरस्य निर्माण १८६० तमे वर्षे अभवत्।[35] पुरातत्त्वविद्भिः १८८२तमे वर्षे सर्वेक्षणमेकं विधायि। तदनु समुद्रेऽप्यन्वेषणञ्जातम्।[36] प्रथामान्वेषणं १८८३ तमे वर्षे अभूत, द्वितीयान्वेषणं-१९८४ नबम्बरदिसम्बरमासे तृतीयानुसन्धानं १९८५ इत्यस्य दिसम्बरमासेऽभवत्।[37] चतुर्थानुसन्धानं विश्वविद्यालयानुदानायोगद्वारा शैक्षणिककार्यक्रमान्तर्गतत्वेन सम्पन्नमभूत्। १९८२तमे कृतसर्वेक्षणे पञ्चशतफीटपरिमिता भित्तिरेका अमिलत्। समुद्रः भित्तेः प्रभूतक्षतिं कारितवान्। इतः दीप्तरक्तमृत्तिकापात्राणि अन्वेषणसमये हस्तङ्गतानि। समुद्रकूलतः अशीत्यधिकैशतमीटरपरिमितस्थानं (पाषाणखण्डस्य मापः 1x0.6x0.5 मी.) स्थूलपाषाणक्रमः अवलोकितः।[38] समुद्रकल्लोले खण्डित 220x14 मी. परिमितः काष्ठविशेषः प्राप्तः। वर्तमानसमये अस्योपरि अन्वेषणम्प्रचलति।[39]

### *3.2.3.2 हनुमानदांडीमन्दिरम्*

मन्दिरमिदं पञ्चशतवर्षप्राचीनमस्ति। सम्पूर्णभारतवर्षे एकमात्रमिदमन्दिरमस्ति यत्र हनुमन्मकरध्वजयोः मेलनमवलोक्यते।[40] इदम्म्मन्दिरं हनुमतः सिद्धस्थलेष्वन्यतममस्ति।अत्र हनुमतः स्ताभितमूर्तिः अत्यन्तभव्या आकर्षिका स्वयमुत्पन्ना चास्ति। अत्र बेटमुख्यमन्दिरं नागेश्वरात् पञ्चकिलोमीटरपरिमितदूरे संस्थितमस्ति। एतत् श्रूयते यत् हनुमन्मकरध्वजयोः मेलनमत्रैवाभवत्।श्रीरामलक्ष्मणं स्वस्कन्धे उत्थाप्य इतः पातालं नीतवान् हनुमान्।[41]

### *3.2.3.3 ऋणमुक्तेश्वरमहादेवमन्दिरम्*

द्वारिकातः द्विकिलोमीटरपरिमितदूरस्थाने ऋणमुक्तेश्वरमहादेवमन्दिरमस्ति। यस्य सम्बन्धे किंवन्दतीयमस्ति ऋणमुक्तेश्वरमहादेवस्य दर्शनेन पूजनेन एवञ्च तस्य अभिषेकेन श्रद्धालवः भक्ताः देव-ऋषि-मनुष्यादयः सम्पूर्णऋणेभ्यः मुक्तिम्भजन्ते।[42]

### *3.2.3.4 हरसिद्धिमातुः मन्दिरम्*

नागेश्वरमार्गिपरि प्रायः २.५किलोमीटरदूरं हरसिद्धिमातुः पवित्रमन्दिरमस्ति। अस्य मन्दिरस्य निर्माणं १९७४तमे वर्षे अभवत्।[43] मन्दिरपरिसरे मातुः हरिसिद्धिमातुः भव्यमन्दिरातिरिक्तमुद्यानं बालक्रीडाङ्गणम्, कथाकीर्तनस्य सत्सङ्गादीनां शोभनव्यवस्था च वर्तते।

### *3.2.3.5 सिद्धिविनायकमन्दिरम्*

द्वारकताः चतुर्किलोमीटरदूरे नागेश्वरमार्गस्थितमतीवप्राचीनं गणपतिमन्दिरं विद्यमानमस्ति। मन्दिरमिदं जगत्गुरुनटेश्वरशङ्कराचार्येण स्थापितम्।[44] अत्र गणेस्य पूजनानन्तरं तात्कालिकफलं लभते।

### *3.2.3.6 इन्द्रेश्वरमन्दिरम्*

द्वारकानागेश्वरमार्गे एव इन्द्रेश्वरमन्दिरं विद्यते।[45] अर्जुनः इन्द्रस्य पुत्रः आसीत्।अत एवतस्य आख्यानमिन्द्रेश्वर

अभवत्। द्वि-त्रिदशकेभ्यः अस्य मन्दिरस्य विकासः जीर्णोद्धारश्च प्रचलति स्म।

### *3.2.3.7 दीपस्तम्भः*

द्वारकानागेश्वरमार्गे एव समुद्रस्य तटे १३५पादोन्नतः दीपस्तम्भः अस्ति।[46] स्तम्भोऽयं चतुश्चत्वारिंशद्वर्षेभ्यः कार्यरतोऽस्ति।[47] द्वारकाधीशदर्शनार्थिनः ये यात्रिणः इहायान्ति तेषां स्मरणीयस्थलमिदम्। द्वारका-ओखा-कच्छानां सम्पूर्णक्षेत्रे मालवाहकजालयानानां मत्स्योपजिविनां दीपस्तम्भोऽयं दिशासूचकोऽस्ति।दर्शनार्थी दीपस्य दर्शनार्थं नूनमेवात्र आगच्छन्ति। प्रत्येकाहनि सायं चतुर्वादनतः पञ्चवादनं यावत् स्तम्भोऽयं यात्रिणाङ्कृते उद्घाट्यते। ७/१/१९६३ दिनाङ्के अस्य दीपस्तम्भस्य स्थापना अभवत्।

### *3.2.3.8 गोपीतडागः*

नागेश्वरद्वारकामार्गे बेटद्वारकातः प्रायः षट्किलोमीटरदूरे गोपीतडागनाम्नः सुप्रसिद्धतीर्थस्थलमस्ति।[48] अस्मिन् ईदृशी कथा अस्ति यत् भौमासुरानामा एकः राजा वरुणस्य छत्रं मातुः अदितेः कुण्डलम्, मेरुस्थितदेवतानां मणिपर्वतनामकस्थानं बलादपहृतवान्। ततः इन्द्रः द्वारकामागत्य श्रीकृष्णाय सर्वं कुकृत्यं श्रावयामास। यदा भगवान् श्रीकृष्णः स्वप्रियभर्यया सत्यभामया सहं गरुमारुह्य भौमासुरस्य राजधानीं प्राङ्ज्योतिषपुरं ययौ। तत्र महान् युद्धः जातः। तस्मिन् युद्धे भौमासुरः हतः। तस्य राजधान्यामन्तः प्रविश्य भगवान् कृष्णः ददर्श यत्भौमासुरः षोडशसहत्रराजकन्याः बन्दिशालायां निगृहितवान्। ततः ताः राजयुवत्यः भगवतः अद्भुद्रूपमवलोक्य मोहिताः जाताः, किञ्च ताः भगवतः अहैतुकीकृपाप्प्रास्यर्थं स्वसौभाग्यस्य समेधनाय स्वप्रियतमरूपेण भगवन्तं वृणितवत्यः।तदनन्तरं भगवान् कृष्णः पृथग्-पृथग् विधिना विविधविलक्षणरूपाणि धृत्वा शास्त्रोक्तविधिना तासां युगपद्पाणिग्रहणञ्चकार।[49]

### *3.2.3.9 मूलगोमती*

नागेश्वरात् अष्टादशतः-विंशतिकोलोमीटरदूरं गोमत्याः उद्गमस्थलं मूलगोमतीनाम्ना विख्यातमस्ति।[50]

### *3.2.3.10 चन्द्रभागामन्दिरम्*

नागेश्वरात् प्रायः दशकिलोमीटरदूरं बरडिया इत्यस्य पार्श्वे भगवतः द्वारकाधीशस्य कुलदेव्याः मातुः चन्द्रभागायाः विशालमन्दिरं विद्यमानमस्ति। अस्य दर्शनं पूजनञ्च कृत्वा भक्ताः स्वमनोकामनाः पूरयन्ति।[51]

### *3.2.3.11 सूर्यास्तबिन्दुः*

सूर्यास्तबिन्दुरयं समुद्रतटे अवस्तितः अस्ति। अस्य सूर्यास्तबिन्दुदर्शनार्थं निर्मितेषु सोपानेषु प्रथमं उत्तरायनं द्वितीयं दक्षिणानायनञ्च प्रदर्शयति।[52] ततः पश्चात् यानि सोपानानि सन्ति तानि सप्ताहस्य सप्तदिनानां बोधकानि भवन्ति। ततः अधः यन्निर्मितं वृत्तचक्रं तत्पृथिवीकल्पनायाः रेखाङ्कं सूचयति। तस्य समनन्तरं द्वितीयवृत्तं

क्षितिजसूचकमस्ति। अस्मिन् निर्माणे सप्तविशंतिनक्षत्राणां सूचकानि सप्तविंशतिः छिद्रानि सन्ति। खगोलशात्रिणः विद्वासं सूर्यास्तस्य विशिष्टदर्शनं कृत्वा कालगणनां करोति।

### *3.2.3.12 ओखा*

भारतस्य पश्चिमसमुद्रतटावसाने ओखा इति स्थलं भारतस्य प्रवेशद्वारमस्ति। स्वतन्त्रतातः पूर्वं ओखा इत्यत्र ईस्ट-इंडिया कम्पनी, वर्माशेलप्रभृतिदैशिकवैदेशिकसंस्थाश्चात्र व्यापारक्षेत्रे कार्यरताः आसीत् यतः ओखा इति स्थानं प्राकृतिकनौकाश्रयस्थानमासीत्।[53] अत्र नागेश्वरं ५.७किलोमीटरदूरे संस्थितमस्ति।

### *3.2.3.13 भद्रकालिमन्दिरम्*

नागेश्वरद्वारकमार्गे भद्रकालीमातुः विशालं भव्यञ्च मन्दिरमस्ति। अस्मिन् मन्दिरे पाषाणे श्रीचक्रमङ्कितमस्ति। श्रीशारदापीठस्य आराध्यायाः भगवत्याः भद्रकाल्याः विशिष्टस्थानं महत्वञ्चास्ति।[54] अस्याः दर्शनेन पूजनेन च सकलमनोरथां सिद्धिमाप्नुवन्ति।

### *3.2.3.14 सिद्धेश्वरमहादेवमन्दिरम्*

अत्यन्तजीर्णशीर्णखण्डितमन्दिरस्यास्य जीर्णोद्धारः द्वारकाशारदापीठाधीशेन जगद्गुरु-स्वामीस्वरूपानन्दसरस्वतिकरकमलेन चतुरशीत्युत्तर-उनविंशतिशततमे वर्षेऽभूत्।[55] अतीवप्राचीनमन्दिरमिदमस्ति।

### *3.2.3.15 सङ्गमनारायणमन्दिरम्*

गोमत्याः सङ्गतिः समुद्रेन सह यत्र भवति तस्मिन्नेव सङ्गमस्थले सङ्गमनारायण-मन्दिरमवस्थितमस्ति।[56] अस्य दर्शनेनैव द्वारकायात्रायाः पुण्यफलं प्राप्यते।

### *3.2.3.16 गोमती*

वैदिकसंस्कृतौ नदीनाङ्कृते मातृशब्दस्य व्यवहारः भवति स्म। मातृशब्दः पालनार्थः पोषणार्थकः, पवित्रार्थकः, जीवनस्य संशोधकश्चास्ति। अत एव अनेकानि तीर्थानि पवित्रनदीनां तटे समवस्थितानि सन्ति।[57] द्वारिकानगरी अपि गोमत्याः एवं अरबसागस्य तटे स्थिता अस्ति। गोमती गङ्गाः अपररूपा अस्ति, या खलु वशिष्ठदुहिता अपि कथ्यते। अस्य वर्णनं स्कन्दपुराणस्य द्वारिकमाहात्म्यस्य अन्तर्गत्वेन पञ्चमाध्याये विस्तृतरूपेण प्राप्यते। यस्यानुसारं सनाकादिप्रार्थनामाकर्ण्य पुण्यसलिला गङ्गारूपेण अवतृतवती।[58] गोमत्यास्तटे निर्मिताः घट्टाः जीर्णाः आसन् सम्प्रति एव अस्य जीर्णोद्धारः जातः।

### *3.2.3. 17 पञ्चनदतीर्थम्*

गोमत्याः नद्याः द्वितीयतटे पञ्चनदतीर्थमस्ति यस्य लोकभषायां पञ्चकुई इत्यभिधानमस्ति।[59] अस्य स्थानस्य असाधारणवैशिष्ट्यमिदमस्ति यत्स्थानं परितः समुद्रमस्ति। यस्य जलं लवणयुक्तमस्ति। यस्य मध्ये

पञ्चनदतीर्थमस्ति। अस्य पञ्चकूपानां जलं मधुरमस्ति, अयं प्रकृत्याः चमत्कारः अस्ति।

### *3.2.3.18 द्वारिकापुरेः मुख्यद्वारिकाधीशमन्दिरम्*

गुजरातप्रान्तस्य पश्चिमतटे द्वारिका समवस्थिता अस्ति, एवं स्वीक्रियते वर्तमानत्रैलोक्यसुन्दरजगन्मन्दिरस्य पुनर्निर्माणं मुगलशासकेन अकबर इत्यनेनाकारि। भगवतः द्वारकाधीशस्य मन्दिरं पश्चिमाभिमुखमस्ति। मन्दिरस्य प्रवेशद्वारद्वयमस्ति। दक्षिणस्य प्रवेशद्वारं यत्र गोमतीघट्टम्प्रति षड्पञ्चाशत्सोपानानि आरुह्य प्रवेशः क्रियते, तद्वारं स्वर्गद्वारमिति कथ्यते।[60] उत्तरस्य प्रवेशद्वारं मोक्षद्वारमिति कथ्यते। पूर्वपश्चिममन्दिरस्य परिमापः 27.4 मी. लम्बः। उत्तरदक्षिणे मन्दिरं 22 मी. लम्बः।[61] पुरातत्वानुसन्धानस्य कृते गोमतीनद्याः साक्षात्पश्चिमे भागे समुद्रनारायणस्य अथवा वरूणदेवस्य मन्दिरमतीवमहत्त्वपूर्णमस्ति।[62] द्वारकासम्बन्धिनः पुरातनज्ञानस्य एकस्मिन् ताम्रपत्रे मिलति। ताम्रपत्रमिदं वल्लभ्याः मैत्रकस्य सामन्तशासकसिंहादित्येन लेखितम्।[63] अद्भुतेयं नगरी। प्रत्येकं दुर्गं गुम्बदञ्च परितः स्वर्णमण्डित, रजतमण्डितञ्चासीत्। इमेः दुर्गाः सूर्यरश्मिभिः एवं कान्तिमन्तः भान्ति यथा अनेकसूर्याः उदिताः इति। भित्तौ गुम्बदे स्वर्णरजतयोः कलाकृतयः विद्यमानाः आसन्। प्रसादशिखाराणि स्वरणरजतमण्डितानि आसन्। नागरिकानाङ्कृते मध्ये आवासाः निर्मिताः आसन्। यः पञ्चवर्णीयः पञ्चरङ्गयुक्तः आसीत्। नगरे आहत्य त्रीणि द्वाराणि आसन्। येषाम्मध्ये श्रीकृष्णस्य नैजदुर्गः आसीत्।[64] प्रथमदुर्गे भगवतः शिवस्य विशालमन्दिरमासीत्। श्रीकृष्णस्य स्वद्वारे लीलासरोवारनमकं जलाशयमासीत्। यस्य सुरक्षाव्यवस्था समीचीना आसीत्। अत्रैव श्रीकृष्णस्य सुदर्शनचक्रमासीत्। श्रीकृष्णस्य राजमहिषीणां निवासार्थं दुर्गे नानावर्णयुक्तानि वर्गाकृतराजभवनानि आसन्। अस्यां नगर्यां अनेकाः लघुपर्वतश्रृङ्खलाः आसन्, यत्र इमे दुर्गाः स्थिताः, श्रीकृष्णस्य भवनं बैजनामके पर्वते आसीत्।[65] श्रीकृष्णस्य भवनं उनचत्वारिंशत्किलोमीटरपरिमितक्षेत्रे विस्तृतमस्ति।

**(ङ)पञ्चमावर्ते** दण्डकारण्यनाममुख्यशीर्षकेऽस्मिन् अधोलिखितोपशीर्षकेषु वस्तुध्वनिः, अलङ्कार ध्वनिः रसध्वनिश्चेतेषां स्वरूपं पश्यामः।

**हरिद्वारम्** शीर्षके महाकविः हरिद्वारस्य धार्मिकं प्रकृतिवन्यप्राणीजन्यञ्च मनोहरस्वरूपे वस्त्वलङ्कार रसेति ध्वनित्रयं निरूपयति।

**प्रवहति खलु सा हरिद्वारदेशे जाह्नवी सदा चेतनोवोच्छलन्ती, चेत्वरानारतं सा भासमाना हिमार्द्रा शुभाना विलानाकुला शीतला पावनी भास्वरा मत्वरा शाश्वती भास्वती स्यन्दतेऽनर्गलं चार्गलां मानसस्य कुण्ठितां मानुषे-मानुषे मानसस्यापनीयाञ्जसात्यद्भुततं सर्वोभद्रकं पद्यबन्धं लताबद्धश्चाराद् विचित्राकृतीश्चित्रकाव्यं यथोल्लासन्ती कवेः कल्पना । कनखलकलं इह सा कलं लपन्ती , शिवं निर्मलं निश्चलं तत्समस्तं मलं क्षालयन्ती, किलालं च न कश्मलं कल्मषं मार्जयन्ती प्रेरयन्ती। शीतभीत्यार्दिता मृत्युनाऽऽलिङ्गिता कुष्ठरोगेण लज्जापिताः भीषिता जानु सङ्कोचपूर्वं तथाऽत्यन्तसङ्कोचपूर्वं प्रसार्यप्रकोष्ठं स्वकं यत् कराग्रेण हीनं च दीनं तथा खण्डितं गालितं च श्लथं च व्रणैर्जर्जर केवलां दीनदीनां दृश सारयन्तोऽनिशं नो वदन्तो वचो निश्चितं निर्धनाः सन्ति ते साधवः सज्जना धीधनाः साधुसङ्घे परं ते कथं प्राप्नुयुर्वा पदं यत्र काषायिता कुष्ठरोगेण वा हीनता एव सा साधुता।** [19]

कथितञ्च अत्र यत् सा जाह्नवी सदा चेतनोवोच्छलिता हरिद्वारदेशे खलु प्रवहति, सा हिमार्द्रा भासमाना शुभाना विलानाकुला शीतला पावनी भास्वरा मत्वरा शाश्वती भास्वती चेत्वरानारतं स्यन्दते। अनर्गलं चार्गलां मानसस्य कुष्ठितामपनीयां मानुषे-मानुषे जसाति। सर्वोभद्रकं पद्यबन्धं लताबद्धश्चाराद् यथोल्लासिता विचित्रा

कृतिश्चित्रकाव्यमति कवेः कल्पना स्फुटिता। सा इह कनखलकलं निर्मलं निश्चलं शिवं लपन्ती तत्समस्तं मलं क्षालयन्ती, अस्माकं किलालं कश्मलं कल्मषं मार्जयति, जडशीतभीत्यार्द्रिताः मृत्युनाऽऽलिङ्गिताः कुष्ठरोगेण भीषिताः लज्जापिताश्च अत्यन्तसङ्कोचपूर्वं जानुसङ्कोचपूर्वं च स्वकप्रकोष्ठं प्रसार्य कराग्रेण दीन-हीनं च खण्डितं गलितश्च श्लथवृणैर्जजरं तथा केवलां दीनदीनां वचः दृशम् अस्मान् वदन्तः सारयन्तः निश्चितनिर्धनाः ते साधवः सन्ति, ते सज्जनाः धीधनाः साधुसङ्घे परं पदं कथं प्राप्नुयुर्वा यत्र सा हीनता एव साधुतास्ति। एतस्मिन् गद्ये सा हिमार्द्रा भासमाना शुभाना विलानाकुला शीतला पावनी भास्वरा मत्वरा शाश्वती भास्वती पदेषु उपमा, मानुषे-मानुषे पदे अनुप्रासालङ्कारः तथा जडशीतभीत्यार्द्रिताः, कुष्ठरोगेण भीषिताः लज्जापिताश्च पदेषु भयानकरसः, खण्डितं गलितश्च श्लथवृणैर्जजरं तथा केवलां दीनदीनाः पदेषु बीभत्सरसे सति रसध्वनिः ध्वन्यते।

**(च)षष्ठावर्ते** गद्यवीथीमुख्यशीर्षकेऽस्मिन्नधोलिखितोपशीर्षकेषु वस्तुध्वनिः, अलङ्कारध्वनिः रसध्वनि श्चेतेषां स्वरूपं पश्यामः।

**उपशारदाविवाहम्** शीर्षके महाकविः आधुनिकसमाजे विवाहावसरे विघटिताडम्बरितमानव व्यवहारवर्णने वस्त्वलङ्काररसेति ध्वनित्रयं निरूपयति।

**शारदाया विवाहवेला निकषायते। वेलायाः पारं गर्जति अज्ञातानां सम्भावनानामाशङ्कानां पारावारः। अध्यापकस्य शारदापितुर्मन उत्कायते। अव्यस्थितं व्यवस्थापयन्ति। तथापि बहु वरीवर्त्यव्यवस्थितम्। अवस्थितं भयम्। यद्येवं क्रियेत तर्हि एवमेवं स्यादिति विकल्पा उच्चीयन्ते शङ्कास्तथापि न क्षीयन्ते। इयमानीयते दग्धमुखी कृष्णकलेवरा मृत्तैलचुल्ली आगतमात्रेषु वरपक्षीयेषु सद्योनिर्मितचायपेयपरिवेषणाय। समागतो विवाहदिवसः। । कदा प्राप्स्येत वरयात्रेति प्रश्न समेषां मनपट्टिकासु निकषायते। आशङ्का उत्कटायते, प्रतीक्षा प्रसरायते। जन्यवासे तव व मम च विवाह एतादृश एव जन्यवासे विहरिष्याम ससुखमिति वधूभ्रातुः श्यामस्य सुहृदां परिहासश्चञ्चलायते। अपीयं वरयात्रा अन्यैव सामग्र्या व्यरचि विधात्रा, अपीमे मानवा उत दानवा किं वा भूतवैतालाः, शिवगणा वावतीर्णाः निगीर्णा यैः सभ्यता, धुता शालीनता हता मानवता। स्वपितुरेव सम्पदिति कृत्वा मदिराकुतुपशमुदरीकृत्य युवकजनसमूहो मत्तायते। अभ्रं भ्रमितुमिव भ्रमायते।अथेयं प्रचलति वरयात्रा। चपला बालका वरयात्रासङ्गताः। पार्श्वतः पृष्ठतो वा प्रौढाः, शनैः शनैश्च रिङ्गन्ति वृद्धाः। राजमार्गं स्थितेषु भवनेषु उपगवाक्षमास्तृणोत्यक्षपटलं किशोरीणां गणः। दरमुकुलितनयना दर्शं दर्शं विहसन्ति महिलाः। प्रचलित वरयात्रा। गच्छति संस्काराणां शवयात्रा। तथापि जीवनयात्रा प्रचलति।**[20]

कथितश्च अत्र यत् शारदायाः विवाहवेला निकषा आगता, अज्ञातसम्भावनाशङ्कापरावारः वेलायां गर्जति। शारदायाः अध्यापकपितुः मन उत्कटितम्। अव्यवस्थितं व्यवस्थितं कुर्वन्ति। तथापि बहु अव्यवस्थितं यदवस्थितं भयं जनयति। यद्येवं क्रियेत् तर्हि एवमेव स्यादिति विकल्पा कथिताः तथापि शङ्काः न गता। इयं दग्धमुखी कृष्णकलेवरा मृत्तैलचुल्ली वरपक्षीयागतमात्रेषु सद्योनिर्मितचायपेयं परिवेषणाय नीयते। विवाहदिवस आगतो मध्याह्नवेला जाता। वरयात्रा कदा प्राप्स्येदिति समेषां मनसि निकषाशङ्का उत्कटा, प्रतीक्षा विस्तारिता। श्यामस्य सुहृद इतश्च जन्यवासे तव मम च विवाह एतादृश एव जन्यवासे विहरिष्यामेति ससुखं चञ्चलाः परिहसन्ति, विधात्रा वरयात्रा इयमपि अन्यैव सामग्रीभिः रचिता। एते मानवा उत दानवाः किं वा? भूतवैतालाः शिवगणाः वा अवतीर्णाः यैः सभ्यता निगीर्णा, शालीनता धुता, मानवता हृता च। स्वपितुरेव सम्पदिति कृत्वा युवकजनसमूहः मदिराकुतुपशतमुदरीकृत्य मत्त अभ्रभ्रमितुमिव भ्रमति, वरयात्रा प्रचलति। इमे चपला बालकाः वरयात्रासङ्गाताः प्रेरिताः चिरण्ट्यः प्रवर्तिताः प्रचलन्ति। । प्रौढाः वृद्धा पार्श्वतः पृष्ठतः वा शनै-शनै गच्छन्ति रिङ्गन्ति च। राजमार्ग स्थितभवनेषु उपगवाक्षम् अक्षिपटलस्फारितमहिलाः दरमुकुलित नयना दर्शं-दर्शं विहसन्ति। वरयात्रा प्रचलते संस्काराणां शवयात्रा गच्छति। अस्माकं लल्लुकस्य श्वशुरालयेति कृत्वा सुरसैव स्वाननं निखिलनगरमेव कवलीकर्तुमियं स्फारयति। तथापि प्रसक्ता जीवन यात्रा प्रचलति। एतस्मिन् गद्ये मध्याह्नवेला, वरयात्रा, बालकाः,

शवयात्रा, श्वशुरालय पदेषु वस्तुरूपत्वेन वस्तुध्वनिः, इयं दग्धमुखी कृष्णकलेवरा मृत्तैलचुल्ली पदे रूपकालङ्कारः, एते मानवा उत दानवाः किं वा? पदे भ्रान्तिमानालङ्कारः, इमे चपला बालकाः वरयात्रासङ्गाताः प्रेरिताः चिरण्व्यः प्रर्वतिताः प्रचलन्ति तथा प्रौढ़ाः वृद्धा पार्श्वतः पृष्ठतः वा शनै-शनै गच्छन्ति रिङ्गन्ति पदेषु स्वभावोक्तिरलङ्कारे सति अलङ्कारध्वनिः, श्यामस्य सुहृद इतश्च जन्यवासे तव मम च विवाह एतादृश एव जन्यवासे विहरिष्यामेति ससुखं चञ्चलाः परिहसन्ति तथा अक्षिपटलस्फारितमहिलाः दरमुकुलितनयना दर्शं -दर्शं विहसन्ति। पदेषु हास्यरसे सति रसध्वनिः व्यज्यते।

**(छ)सप्तावर्ते** लहरीपञ्चकमितिनाममुख्यशीर्षकेऽस्मिन्नधोलिखितोपशीर्षकेषु वस्तुध्वनिः, अलङ्कार ध्वनिः रसध्वनिश्चेतेषां स्वरूपनिरूपणम्।

**गृहलहरी** शीर्षके महाकवि आधुनिकगृहस्वरूपवर्णने वस्त्वलङ्काररसेति ध्वनित्रयं निरूपयति।

**के गेहा? न बहिर्भवन्ति ननु ये, तत् कुत्र ते स्युः,पुनर्नूनं तेऽन्तरहो भेवयुरथ किं तद् वस्तु यत्र स्थिताः।**
**सा निश्चप्रचमेव स्याद्धि गृहिणी यस्यां गृहाः संस्थिताः,गेहेष्वेव न सा भवत्यविकला गेहा हि तस्यां स्थिताः।।**
**वास्तुब्रह्मणि मण्डनैर्विलसिते विन्यस्तरेखाश्चिते,साकारत्वमुपागतेऽतिवितते विश्रान्तिमाप्ताः सुखम्।**
**कोट्यस्तास्त्र्यधिका इहैव लसितास्त्रिंशत्सुराणां शुभा,गेहाः सन्ति सजीवविग्रहमया देवा समस्ता इमे।।**
**हाहाकारसमाकुलास्तु नितरां यातेषु दारेषु ते,गेहास्तेषु समागतेषु च पुनः सोच्छ्वासमाप्ता सुखम्।।**
**किं गेहा ननु तेऽङ्गणैर्नहि रवा यत्र श्रुताः काकजाः,किं काकाः किल ते रटन्ति नहि ये स्थित्वा तु गेहच्छदौ।**
**किं काकस्य ध्वनिः स यो गृहजनं नोत्कण्ठयेत् कौतुका**
**दुत्कण्ठापि च किन्नु सा न खलु या सम्भावयेद्वाऽतिथिम्।।**
**हस्तैः स्वैः श्रमसन्नतैश्च कठिनैरुत्थाप्य भित्तीर्दृढा,ये निर्मान्ति गृहाणि जे स्वयमहो नैवाप्नुवन्ति च्छदिम्।**
**छायायै स्पहयन्ति सन्ततमिमे गेहस्य ते कस्यचित्ये कुर्वन्ति च कर्म वास्तुविधये दैनिन्दिनैर्भाटकैः।।**
**भूयो भ्रम्यति वङ्क्रमीति चकितोऽसौ सम्भ्रमाद् बम्भ्रमन्**
**क्लेशेः क्लाम्यति ताम्यति प्रचलितो जानाति नासौ सुखम्।**
**अब्धि चापि तितीर्षतीव विधुरो नौकां विना दुस्तरं,गेहा यस्य न सन्ति सोऽत्र पुरुषः श्राम्यत्जस्रं भवे।।**
**शेते कश्चन राजमार्गनिकषा कश्चित् तथा पद्धतौ,केचित् स्थानक एव शेरत इमे केचित्तु सेतोरधः।**
**अन्ये निःशरणा रणे विनिहिता अज्ञायमाना यथा,योद्धारः स्वकलेवरं जहति ते नैव क्वचित् शोचिताः।।**
**निर्द्वारं निरलिन्दमेव निभृतं निर्भित्ति निष्प्रस्तरं,गेहान् संरचयन्ति चापि सुदृढानीशा निरीहा अपि।**
**आकाशस्य छदिं दिशामतिदृढा भित्तीश्च वायोः पटं,कृत्वा कुट्टिममत्र चैव धरणेः केचित् सुखं शेरते।।**[21]

कथितश्च अत्र यत् ये गृहाः बहिर्नभवन्ति परन्तु ते कुत्र ? तर्हि ते अन्तः भवेयु यत्र वस्तूनि स्थापितानि, वस्तुत यत्र सा विकलता सर्वतः वारिताः ते गृहशब्दपदवाच्या। एतेषु वास्तुदेवः ब्रह्माण्डपविस्तीर्ण रेखासु साक्षाद्रूपेण आगत्य व्याप्नोति, विश्रान्तिभूतसुखं विभाति त्र्यस्त्रिंशत् कोटिशुभाः देवताः अन्तः वसन्ति। इत्थ एते समस्त देवानां साक्षातविग्रहरूपाः शोभन्ते। गृहपतिनः गृहाद् बहि कुत्रापि गते सति अनाथत्वेन एतेऽवतिष्ठन्ति। पत्युः गते यदा दारा सन्ततिचिन्ता विधत्ते, निर्गता सा तदा एते नितरां हाहाकारत्वेन तन्तुजालनिविडवत् व्याकुलाः भवन्ति परन्तु पुनः समागतेषु स्वस्वोच्छ्वासं सुखेन परित्यजन्ति। कीदृशाः ते गेहाः येषाम् अङ्गणे काकानां रवः न श्रुतः, ते कीदृशाः काकाः ये किल गेहच्छदौ समागत्य न रटन्ति। को ध्वनिः काकानां यो गृहजनानां कौतुकोत्कष्ठां न जनयेत् कीदृशी उत्कण्ठा सा खलु या गृहद्वारेऽतिथिं न सम्भावयते। ये श्रमासक्ताः भूत्वा स्वहस्तैः कठिनकर्मदृढ भित्तीः निर्मान्ति ते स्वयमेव गृहच्छदिं न प्राप्नुवन्ति। ये वास्तुविधिभिः कर्मकुर्वाणाः भाटकेषु दैनन्दिनीं यापयन्ति ते इमे कस्यचित् ग्रहस्य छायामेव सन्ततं स्पृशन्ति। बहुधा भ्रामेयन् चक्रं दृष्ट्वा तस्य सम्भ्रमाद् घूर्णित असौ चकितः कलशैः क्लान्तम्लान्ततया चिन्तयति यत् नात्र सुखमस्ति। अत्र विना नौकां विधु अतीवदुस्तरसागरं तर्तुं यतते। यस्य पार्श्वे गृहाः न स्युष्ते पुरुषाः श्राम्याः भूयाः मिथ्याभवे तिष्ठन्ति। राजमार्गसमीपं कश्चन निद्राति, कश्चित् पदाति पथि, इमे केचन यानस्थानके, केचित् सेतुरध निद्रायिता, अन्येऽज्ञायमानाः बार्णैः रणे विनिहिताः ते योद्धार अशोच्य

स्वकलेवरं परित्यजन्ति। अत्र निरीह ईश्वरः द्वारनिर्लिन्दाभृत्तभित्ति प्रस्तरान् विना गेहान् संरचयति यत्र आकाशस्य छदिः, दिशासुद्रणभित्तयः वायुपटं विधाय सम्पूर्णधरां कुटीकृत्य केचिदत्र सुखेन शेरते।

एतेषु पद्येषु गृहाः, वास्तुदेवः, ब्रह्माण्ड, देवताः, दारा, सेतु, योद्धार, ईश्वरः, आकाश पदेषु वस्तुरूपत्वेन वस्तुध्वनिः तथा एते समस्त देवानां साक्षातविग्रहरूपाः पदे रूपकाङ्कारः, भ्रामेयन् चक्रं दृष्ट्वा तस्य सम्भ्रमाद् घूर्णित असौ चकितः कलशैः क्लान्तम्लान्ततया चिन्तयति पदे भ्रान्तिमानालङ्कारः, ईश्वरः द्वारनिर्लिन्दाभृत्तभित्ति प्रस्तरान् विना गेहान् संरचयति पदे विभावनालङ्कार, उत्कण्ठा सा खलु या गृहद्वारेऽतिथिं न सम्भावयते पदे उत्प्रेक्षालङ्कारे सति अलङ्कारध्वनिः तथा एते नितरां हाहाकारत्वेन तन्तुजालनिविडवत् व्याकुलाः भवन्ति पदे भयानकरसे सति रसध्वनिः ध्वन्यते।

**7.निष्कर्षः–**महाकविविरचितसम्प्लवकाव्यसङ्ग्रहग्रन्थे समस्तसप्तावर्तेषु पद्यगद्यात्मकविविध शीर्षकान्वितोपशीर्षकेषु काव्यत्वं निरूपितमस्ति।सर्वेषु आवर्तेषु एतत् विदितं भवति यत् महाकविना प्रायशः प्रत्येकस्मिन् छन्दसि ध्वनेरभिव्यञ्जना कृता वस्त्वलङ्काररसध्वनय अत्र सर्वत्र प्रतिभाति। वस्तुध्वनौ विविधवस्तुडिम्भदेवग्रहतारकनक्षत्रधराम्बरगिरिमेघादिनां सहजसरलभाव गम्यार्थबोधाय प्रयोग विहितः। एवमेव अलङ्कारध्वनौ शब्दार्थशब्दार्थेति उपमारूपकसन्देहानुप्रास उत्प्रेक्षाविभावनास्वभावोक्तिविरोधाभासदृष्टान्तव्यतिरेकभ्रान्तिमानालङ्कारादिनां प्रयोगः कथानक सौन्दर्यचमत्काराय प्रस्तुतः। रसध्वनौ च श्रृङ्गारकरुणशान्तवीररौद्रभयानकबीभत्साद्भुतहासनव रसाः रसपरिपाकम् उपस्थाप्य सहृदयानां मनसि श्लाघ्यतरानन्दाय निर्गुम्फिताः सन्ति। इत्थम् अत्र वस्त्वलङ्काररसेतित्रिविधध्वनिप्रयोगः महाकविना प्रत्येकस्मिन् आवर्ते शब्दार्थसौन्दर्याय विहितम्। अस्य महाकवेः काव्येऽस्मिन् ध्वनिवैविध्यनिरूपणं परवर्तीकविभिः नितराम् अनुकरणीमस्ति।

## पादट्टीपणी

1 सम्प्लव 01
2 सम्प्लव 23
3 वा. प. 01/103
4 ध्वन्या. 01/13
5 ध्वन्या .01/13, सा.द. 02/18
6 ध्वन्या. 01/04
7 का.प्र. 01/04
8 सा.द. 04/01
9 ध्वन्या. 02/01
10 ध्वन्या. 01/01
11 शिशु. 04/17
12 सम्प्लव 01
13 सम्प्लव 02
14 सम्प्लव 09
15 सम्प्लव 09
16 सम्प्लव 32-33
17 सम्प्लव 34
18 सम्प्लव 44
19 सम्प्लव 73-74
20 सम्प्लव 78-82
21सम्प्लव 87-90

**प्रस्तोता – (शोधच्छात्रः),केन्द्रियसंस्कृतविश्वविद्यालय भोपालपरिसरः**

 ISSN – 2349-3100

# मुक्तककाव्य झांकार

✍ किरण मिश्रा

'अग्निपुराण'मे मुक्तक के ́ परिभाषित करैत कहल गेल अछि जे–

**''मुक्तकं श्लोक एवैकश्चमत्कारक्षमः सताम्''**[1]

अर्थात् चमत्कारक क्षमता राखयवाला एके टा श्लोक के ́ मुक्तक कहल जाइछ ।

मुक्तक काव्यक प्रणेताके ́ अपन भावके ́ व्यक्त करबाक लेल अन्य सहायक छंदक आवश्यकता अधिक नहि होइछ । प्रबन्ध काव्यक अपेक्षा मुक्तक रचनाक लेल कथाक आवश्यकता अधिक होइछ, कारण जे काव्यक दृष्टिसँ मुक्तकमे नहि तऽ कोनो वस्तुक वर्णन होइछ आ नहि वो गेय (गाबय जाय वाला गीते) होइछ । ई जीवनक कोनो एक पक्षक अथवा कोनो एक दृश्यक अथवा प्रकृतिक कोनो पक्ष विशेषक चित्र मात्र होइछ । इएह कारण अछि जे काव्यकार अर्थात् रचनाकारके ́ प्रबंध काव्यक अपेक्षा सफल मुक्तकक सृष्टिक लेल अधिक कौशलक आवश्यकता होइछ । वास्तवमे मुक्तककाव्यमे सूक्ष्मातिसूक्ष्म मार्मिक भावक अभिव्यिक्त होइत अछि जे स्वयंमे पूर्ण तथा अपेक्षाकृत लघु रचना होइछ । आचार्य विश्वनाथ साहित्य दर्पणमे 'मुक्तक' के ́ परिभाषित करैत कहलनि अछि :

**छन्दोबद्धपदं पद्यं तेन मुक्तेन मुक्तकम् ।**[2]

अर्थात् जतय छन्दोबद्ध पद होइछ ओ 'पद्य' कहबैछ । आ जाहिमे आओर पद्यक अपेक्षा नहि रहैछ ओ एक पद्य मात्रके ́ 'मुक्तक' कहल जाइछ ।

मुक्तक काव्य विभिन्न तारतम्यक बंधनसँ मुक्त होयबाक कारणे ́ (मुक्तेन मुक्तकम्) मुक्तक कहबैछ, आ ओकर प्रत्येक पद स्वतः पूर्ण होइत अछि । आधुनिक हिन्दी काव्यक छंद योजना नामक पोथीमे मुक्तके ́ परिभाषित करैत एक ठाम कहल गेल अछि जे– 'मुक्तक वह स्वछंद रचना है जिसके रस का उद्रेक करने के लिए अनुबंध की आवश्यकता नहीं ।''[3]

वास्तवमे मुक्तक काव्यक एक महत्त्वपूर्ण अंग अछि, जाहिमे काव्यकार प्रत्येक छंदमे एहन स्वतंत्र भावक सृष्टि करैत अछि, जे कि अपना-आपमे पूर्ण रहैछ ।

मैथिलीक वरिष्ठ साहित्यकार डा० भीमनाथ झाक मतानुसार ''गीतकाव्य ओ मुक्तकाव्यक बीच सीमारेखा खीचब कठिन अछि । मोटा-मोटी, सभ गीत मुक्तक थिक तथा छन्दोबद्ध लयप्रधान सभ मुक्तक गीत । गीतक एकटा अतिरिक्त विशेषता, जे मुक्तक मे नहि पाओल जाइछ, थिक संगीतिकता ।''[4]

मैथिली काव्य मध्य आधुनिक युगक प्रर्वत्तक चन्दा झाक रचनामे प्रथमतः मुक्तक दर्शन होइत अछि, यथा– देश-दशा, श्रृंगार । एकर अनन्तर यदुनाथ झा 'यदुवर', छेदी झा, मैथिली मधुप[6] पुलकित लालदास 'मधुर'[7] आदि लोकनिक मुक्तकक रचना कयलनि । किन्तु मुक्तकक विशिष्ट छटा पहिलबेर देखबा आयल कविवर सीताराम झाक काव्यमे । कविवरक महाकाव्यके ́ छोड़ि, प्रायः हिनक सभ रचना मुक्तके थीक । हिनक 'सूक्ति-सुधा'क पाँचो बिन्दु तथा अन्य रचना

 ISSN – 2349-3100

सभ मुक्तकाव्यक जड़िके ँ पर्याप्त मजगूत बना देलक अछि । कविवरक मुक्तकमे जेहने चोटगर व्यंगय अछि, तेहने सरस-सरल शब्दावली । जे कि पाठकगणके ँ मन मोहि लैत अछि ।

ई कविवरक मुक्तकक प्रभाव छल जे हिनक समकालीन जतेक कवि भेलाह अछि ओ मुख्यत: मुक्तकक प्रणयन दिसि अग्रसर भऽ गेलाह । यैह कारण अछि जे 'मधुप'जी सेहो मुक्तकक रचना कय मैथिली साहित्यक विकासमे अपन अतुलनीय व महनीय योगदान देलनि ।

**'मधुप'क मुक्तकाव्यक कथ्य ओ शिल्प–**

कविचूड़ामणि 'मधुप' अपन काव्य जीवनक शुरुआते सँ मुक्तकक रचना शुरू कऽ देने छलाह, जे हिनककाव्य साधनाक अन्तिम छोर धारि देखल जाइत अछि ।

हिनक मुक्तकाव्यक विषय-वस्तु बहुत व्यापक ओ विशाल अछि, हेतु जे, जखन जे भाव हृदयमे प्रस्फुटित भेल, ई ओकरा काव्यरूप दैत गेलाह अछि । मधुप मुक्तकक रचना कय सर्वाधिक महत्वपूर्ण काज ई कयलनि जे समाजक दृष्टिमे हेय ओ निकृष्ट बुझल जायवाला विषय-वस्तु सभके ँ अपन काव्य-रचना मध्य चित्रित कयलनि । एहिसँ काव्यक परिधिमे विस्तार तऽ भेबै कैल संगहि एहिमे ओहू विषय सभक समावेश भऽ गेलैक जे पूर्वक कोनो कविक रचना मध्य नहि देखल जाइछ । हिनक रचनासँ एकटा लाभ ई हो भेल जे समाजक उपेक्षित-दलित-पीड़ित वर्गमे आशाक संचार जागि उठल, ओकरोलोकनिमे चेतना आ आत्मविश्वास आबि गेलैक । दलित आ उपेक्षित वर्गमे चेतना जागृत भेलासँ ओकरामे ज्ञानक प्रकाश टिम-टिमाय लागल आ ओहोलोकनि अपनाके ँ समाजक महत्त्वपूर्ण अंग मानल लागल । जाहि सँ शनै:-शनै: समाजमे शोषक वर्गक वर्चस्विता क्रमश: शिथिल होइत गेल । एतबे नहि, एहि सँ लोक आ कविक दृष्टिमे अमूल-चूल परिवर्त्तन भेल– जकरापर ककरो नजरि नहि पड़ैत छल, ताहू सभपर जनताक ध्यान केन्द्रित होब' लागल ।

'मधुप'जी संस्कृतक निष्णात पंडित छलाह, संगहि अलंकार ओ छन्दक अद्वितीय प्रयोक्ता । यैह कारण अछि जे हिनक मुक्तक कऽ रचना मध्य सेहो विभिन्न अलंकारक झंकारके ँ सहजहिँ देखल जा सकैछ । वर्णन-वैशद्य हिनक मुक्तकक उल्लेखनीय तत्त्व थिक ।

कविचूड़ामणिक मुक्तक काव्यक मुख्य लक्ष्य छल– उपेक्षित आ दलित वर्गक प्रति सहानुभूति, धार्मिक भावक उद्भावना आ तत्कालीन आर्थिक, सामाजिक एवं राजनीतिक परिस्थितिक उल्लेख करब रहल अछि । हिनक काव्यक प्रसंगमे प्रो० राधाकृष्ण चौधरीक कहब अछि जे :

"Madhup is a poet of the people and his thems are generally taken out of the events of everyday life.... His poems depict love, light and philosophical lights of Maithili tradition. He can compose street-songs and lyrics with equal fervour."**8**

मधुपजी दीर्घजीवी साहित्यकार छलाह, ते ँ हुनक काव्य मध्य सभ तरहक ओ सभ रंगक महत्वपूर्ण घटनाक दस्तावेज नजरि पड़ैत अछि । एहि अवधिकालमे काव्यमे जतेक विकास भेल आ जतेक परिवर्तन आयल अछि– कविचूड़ामणि मधुप सभक श्रोता, द्रष्टा किम्बा भोक्ता रहलाह अछि । यैह कारण अछि जे हिनक मुक्तकमे दलित-पीड़ित समुदायक प्रति संवेदना, देशक संकटपूर्ण घड़ीमे जनताके ँ कर्त्तव्यपथपर आरूढ़ होयबाक उत्प्रेरणा संगहि तत्कालीन समाजमे होइत अत्याचार, अनाचार आ भ्रष्टाचार पर बेबाक टिप्पणी कैलनि अछि ।

'मधुप' जीक मुक्तकक विशेषता थीक विशद वर्णन विन्यासक संग ओहीमे प्रयुक्त विभिन्न शब्दालंकारक निरूपण । किन्तु कतोक कवि लोकनि एकरा हुनक कमजोरी ओ काव्यक दोष कहलनि अछि । एहि

 ISSN – 2349-3100

विषय पर वरेण्य साहित्यकार आ विद्वान डा० भीमनाथ झाक कहब अछि जे– ''हिनक काव्यक दुर्बल पक्ष अछि ठाम-ठाम वर्णनक कृत्रिमता, अलंकारक अतिशय प्रयोगक कारणे ं आत्मनिष्ठ रागात्मक रसानुभूतिमे बाधा तथा क्लिष्टता ।''[9]

हिनक एहिसभ कमजोरीक उल्लेख करैत डा० जयकान्त मिश्रक मानब अछि जे– "Madhup's weakness is an excessive ornamentation, at times there is a monotonous use of figures of speech, particularly 'Yamaka' and 'Vakrokti'. His orginality is, therefore, sometimes dimmed by an artificality and a mannerism. His vivid deseriptive powers and sonorous arrangement of rhytms and words cannot make his serious poety popular for the common man."[10]

**झांकार–** पं० श्री काशीकान्त मिश्र 'मधुप'क झांकार पहिल मुक्तक संग्रह अछि, जकर प्रकाशन सन् 1942 ई.मे भेल छल तथा एकर दोसर संस्करण 1960 ई.मे प्रकशित भेल ।

विवेच्य कृतिमे कुल 21 गोट मुक्तक संगृहीत अछि । 'कविवर' ई एक शीर्षकक अन्तर्गत दू टा कविता अछि । परन्तु दू ठाम शीर्षक रहितहुँ समान भावाभिव्यक्ति तथा विषयक समरूपता रहबाक कारणे ं एकरा एके कविताक दू खण्ड मानल जाइछ । कवितामे जे चमत्कार अछि, विभिन्न रसक परिपाक अछि आ संगहि अछि उपमा, रूपक, यमक आ उत्प्रेक्षा अलंकारक अद्‌भुत संयोजन । जे कि सहजहिँ देखल जा सकैछ ।

'आवाहन' शीर्षकक माध्यमसँ साङ्गरूपक अलंकार द्रष्टव्य थिक :

**स्नान नोरक जल सँ हम कएल त्रिविध-वेदनाक त्रिकुशा अम्ब ।**
**पाप-तिल, परिश्रम अछि वारि नौकरिक संकल्पे अवलम्ब ॥**
**हृदय-वेदी मे चिन्ता-आगि, दीनता-घृत श्रुव अछि मङनाइ ।**
**समिधि-मन स्वार्थरूप अछि मन्त्र, ध्यान आनक निन्दा सुननाइ ॥**[11]

उपर्युक्त पद्य साङ्गरूपक अलंकार थिक । काव्यप्रकाशमे रूपक अलंकारक लक्षण एहि रूपे ं देल गेल अछि, अवलोकनीय थीक :

(1) **तद्रुपकं भेदो यद् उपमानोपमेययोः ।**[12]

अर्थात् उपमेय एवं उपमानक अभेद आरोपके ं रूपक अलंकार कहल जाइछ ।

(2) आचार्य विश्वनाथ रचित सहित्य दर्पणमे एकर लक्षण एहि रूपे ं निरूपित भेल अछि ।

**रूपकं रूपितारोपे विषये निरपह्नवे ।**
**तत्परम्परितं साङ्गं निरङ्गमिति च त्रिधा ॥**[13]

अर्थात् बिनु निषेध रहने उपमेयमे उपमानक आरोपके ं रूपकालंकार कहल जाइछ । ई तीन प्रकार होइछ– परम्परित, साङ्ग आ निरङ्ग ।

आब साङ्ग रूपक अलंकारक लक्षण देखल जाय :

**''अङ्गिनो यदि साङ्गस्य रूपणं साङ्गमेव तत्''**[14]
**समस्तवस्तुविषयमेकदेशविवर्ति च ।**

अर्थात् जतय अङ्ग सहित उपमेयमे उपमानक आरोप होइछ, तऽ साङ्गरूपक कहबैछ । एकर पुनः दू प्रकार अछि–

(क) समस्त वस्तु विषय वा सावयव रूपक एवं

(ख) एकदेश विवर्त्ती ।

उपरिलिखित पद्यमे स्नानके ँ नोर, त्रिविध कष्टके ँ त्रिकुशा, पापके ँ तिल, हृदयके ँ वेदी, दीनताके ँ घी, आ समिधिके ँ मनक आरोप करबामे समस्त वस्तुविषय रूपक भेल ।

**स्वतः परतः प्रमाण ई बाद, करै छल धीर-दम्पती कीर ॥**
**दूर देशहुँ सँ सुधिगण आबि, श्रवण कै जकरा होथि अधीर ।**
**जाहि देशक गौरव विख्यात, छली भारती भारती नारि ॥**
**आवि जनिका सँ कै शास्त्रार्थ, स्वयं शङ्करो मानलन्हि हारि ॥**[15]

उपर्युक्त पद्यांश शीर्षक 'मैथिलीसँ' लल गेल अछि । एतय यमक, उदात्त आ प्रतीपक मेल सँ संसृष्टि अलंकार होइछ । संसृष्टिक अर्थ थिक मिझहर अर्थात् एहिमे एहन दू व दू सँ अधिक अलंकार मिलल रहैत अछि जे परस्पर निरपेक्ष रहैत अछि अर्थात् ओकरा पृथक कयल जा सकैत अछि ।मम्मटक अनुसार संसृष्टि ओ अलंकार थिक जाहिमे पूर्व प्रतिपादित अलंकारक परस्पर निरपेक्ष रूपे ँ मिश्रण भेल हो । काव्य प्रकाशमे संसृष्टिक लक्षण थिक :**''सेष्टा संसृष्टिरेतेषां भेदेन यदिह स्थितिः ।''**[16]

अप्पयदीक्षितक मतानुसार तिल-तण्डुल न्यायसँ मिलल अलंकार संसृष्टि थिक । ई संसृष्टिके ँ लक्षण एहि रूपे ँ देलनि :

**तत्र तिलतण्डुलन्यायेन स्फुटावगम्यभेदालंकारमेलने संसृष्टि ।**[17]

एतय उपरिलिखित पाँतीमे भारती-भारतीसँ यमक, महान पुरुषक चरितक वर्णनसँ उदात्त यथा– शंकराचार्य, भारती तथा प्रसिद्ध उपमानक तिरस्कार सँ (यथा-शङ्करो)सँ प्रतीप होइछ । जे परस्पर निरपेक्ष अछि, ते ँ संसृष्टि अलंकार भल ।

**की कहु, कवि ! प्राण बचाउ**
**कामिनीक कोमल कपोल कुच,क्रीड़ा कौतुक कान्ति कलित कच**
**कल्पनाक कलुषित न कुंज म, काँटहिँ काँट घुमाउ ॥**[18]

उपर्युक्त पद्यांश वृत्यनुप्रास अलंकार थिक । एतय 'क' केर आवृत्ति सँ वृत्यनुप्रास भेल । हेतु जे एहि ठाम 'क' केर अनेकशः आवृत्ति होइछ ।

**हेरा आरत भए आरत बारि,जाहि सँ पाटल अढ़ुल पलाश ।**
**जटाधारी सरोज लंकेश,मखमली मे लाली हो भास ॥**
**सत्य कहु सजनि कोन दुख भेल, चकोरी ! खाय रहल छी आगि ॥**[19]

मधुप विरचित उपर्युक्त पद्यांश तद्गुण अलंकार थिक । आचार्य विश्वनाथक अनुसारे एकर लक्षण थिक : **''तदगुणः स्वगुणत्यागादत्युत्कृष्टगुणग्रहः ।''**[20]

अर्थात् अपन गुणक त्याग कऽ अति उत्कृष्ट गुणके ँ ग्रहण करबासँ 'तद्गुण' अलंकार होइत अछि ।

ISSN – 2349-3100

कुवलयानन्दक रचयिता अप्पय दीक्षितक अनुसार सेहो एकर लक्षण देखल जा सकैछ–

**तद्गुणः स्वगुणत्यागादन्यदीयगुणग्रहः ।पद्मरागायते नासामौक्तिकं तेऽधरात्विषा ।।**[21]

अर्थात् जतय स्वगुणक त्यागि कऽ आनक गुणके ´ ग्रहण कयल जाइत अछि, ओतय तद्गुण अलंकार होइत अछि । यथा– अहाँक अधरोष्ठक कान्तिसँ नाकक मोती पद्मराग मणिक कान्तिके ´ धारण कय लेलक ।

एतय मधुप विरचित उपर्युक्त पाँतीमे सेहा क्रमशः स्वगुणक त्यागि कऽ आनक गुणक ग्रहण कयल गेल अछि, ते ´ तद्गुण अलंकार भेल ।

**नहि श्यामवर्ण सन और रंग, ते ´ गोदवबैछ गोदना स्व अंग ।**

**सब रमणी प्रेयसी ! ई बिचारू, व्यर्थे न प्रेमिजन के ´ मसली ।।**[22]

उपर्युक्त पद्य अनन्वय अलंकार थीक । आचार्य विश्वनाथक अनुसार एकर लक्षण थीक :

**उपमानोपमेयत्वमेकस्यैव त्वनन्वयः ।**[23]

अर्थात् एक वाक्यमे एके टा वस्तु (पदार्थ) उपमान आ उपमेय भऽ जाइछ तऽ ओ अनन्वय अलंकार कहबैछ । एही तरहक परिभाषा रूय्यक[24] जयदेव[25] वामन, आदि सेहो देने छथि । अनन्वय एक विलक्षण अलंकार थिक । एहिमे कवि उपमेयक सदृश उपमान ताकि निराश भऽ जाइत छथि ते ´ उपमेयके ´ उपमान बना दैत छथि । एतबे नहि, एकर प्रयोग कोनो विशिष्ट व्यक्ति, वस्तु इत्यादिक अलौकिक, अप्रतिम रूप-सौन्दर्यक वर्णनमे सेहो होइछ, ओकरा अद्वितीय सिद्ध करबाक लेल ।

एतय उपरिलिखित पाँतीमे कहल गेल अछि– 'नहि श्यामवर्ण सन और रंग' अर्थात् श्यामवर्णक सदृश उत्कृष्ट आन कोनो रंग नहि अछि, ते ´ अनन्वय भेल ।

**नल सँ उपेक्षिता दमयन्ती सन बिजन विपिन मे कियै वास ?**
**निमर्म राघव सँ परित्यक्ता सीता समान लइछो निसास ।।**

**असहाय-बालविधवाक तुल्य याचना सहैछी जीह दाबि ।।**[26]

उपर्युक्त पद्यांश लुप्तोपमा अलंकार थीक ।

**दिन राति करै छल जे दुलार से पवन आँखिमे दैछ धूलि ।**
**चुम्बन आलिङ्गन देल कते, सबटा कृतघ्न की गेल भूलि ।।**

**अनुकूलो जनो प्रतिकूल ह्वैछ दुर्दिनमे, कारण प्रबल भावि ।।**[27]

उपर्युक्त पद्य वाक्यार्थगत काव्यलिंग अलंकार थिक ।

अलंकारिक विद्वान अप्पयदीक्षितक अनुसार एकर लक्षण थिक :

**समर्थनीयस्यार्थस्य काव्यलिङ्गं समर्थनम् ।**

**जितोऽसि मन्द कन्दर्प मचिच्तेऽस्ति त्रिलोचनः ।।**[28]

जतय समर्थनीय अर्थक समर्थन कयल जाय ओतय काव्यलिंग अलंकार होइत अछि । जेना– हे मूढ़ कामदेव ! अहाँके ´ हम जीति लेलहुँ कारण हमर मोनमे त्रिलोचन छथि ।

एतय सम्पूर्ण वाक्य 'प्रबल भावि' थिक; उक्त पाँती कथनक कारणस्वरूप वर्णित अछि ते ´ वाक्यार्थगत काव्यलिंग भेल । एकरा वाक्यन्यायमूलक अलंकार मानल जाइत अछि जाहिमे कवि अपन कथनक पुष्टि हेतरूप वाक्यक विन्यास द्वारा करैत छथि । लिंगक अर्थ होइछ कारण । एहि अलंकारमे जे बात सिद्ध करबाक रहैत अछि ओकर कारण वाक्यक अर्थमे वा पदक अर्थमे दय देल जाइत अछि ।

**लटकल रहैछ विषधर अनेक, की होइ अहाँ दूषित कनेक,**
**अपनेक पाबि संगति क्षणेक, सुरभित समस्त तरू होइछ वन्य ।**
**जे अछि घँसैत, अथवा कटैत, छी निज सुगन्धि तनिकहु बटैत,**
**अछि के न अहँक महिमा रटैत, ई गुण गौरव औदार्य जन्य ।**[29]

उपर्युक्त पद्य उल्लेख अलंकार थिक, हेतु जे एतय एकहि टा चन्दनक वृक्षके ´ नाना प्रकारसँ वर्णन भेल अछि । एकर लक्षण थिक :

(1) **बहुर्भिबहु धोल्लेखादे कस्योल्लेख इष्यते ।**
**स्त्रीभिः कामोर्थिभिः स्वर्द्रुः कालः शत्रुभिरैक्षि सः ।।**[30]

अर्थात् जतय एकहि व्यक्तिक नाना प्रकारसँ वर्णन हो, उल्लेख अलंकार कहबैत अछि; यथा– (ओ राजा) स्त्रीक द्वारा कामदेवक रूपमे, याचक द्वारा कल्पवृक्षक रूपमे तथा शत्रुक द्वारा कालकरूपमे देखल गेलाह ।

(2) **हेतु ग्रहीता भेद वा विषयक भेद लखाय ।**
**एकक बहु उल्लेखमे तँ उल्लेख कहाय ।।**[31]

ज्ञातृ-भेद एवं विषय-वस्तुक भेदसँ एक वस्तुक अनेकमे उल्लेख उल्लेखालङ्कार कहबैछ ।

एतय उपर्युक्त पद्यमे दृष्टि भेदे ´ एकहिटा चन्दनक वृक्षके ´ कतेको प्रकारसँ गुणगान कयल गेल अछि; यथा– (ओहि चन्दनक गाछके ´) ओहि वृक्षपर अनेको विषधर रहलाहक बावजूद ओ दूषित नहि होइछ, ओकर संसर्गमे रहलासँ अन्य तरू (पेड़) सभ सेहो सुरभित होइछ, जप-पूजा यज्ञादिमे सेहो एहिसँ अनेको कार्य होइछ, ज चन्दनके ´ घसैत अथवा कटैत अछि, ओकरो अपन सुगन्धिके ´ बँटैत अछि ते ´ कवि कहि रहल छथि जे के नहि अहाँक महिमा जनैछ ।

वस्तुतः एकहिटा चन्दनक वृक्षके ´ विभिन्न रूपमे चित्रित कयल गेल अछि, ते ´ उल्लेखालङ्कार भेल ।

**जाहिमे नवरस सुधा हो, ओ विपञ्चिक लय मुधा हो,**
**मुग्ध जे सुनि पुष्प बाला, देथि निज ठोरैक हाला ।**
**काव्य कोविद सँ प्रशंसित, से 'मधुप-झङ्कार' छी हम ।।**[32]

उपर्युक्त पद्य रूपक ओ प्रहर्षन थीक । सर्वप्रथम एतय रूपकके ´ देखल जाय, एकर लक्षण थिक :

**उपमानक उपमेयमे जे आरोप रहैछ ।**
**काव्यरसिकमे ताहिके ´ रूपक बिबुध कहैछ ।।**[33]

जखन उपमान उपमेयपर अपन रूपक आरोप कय दैत अछि तऽ रूपकालंकार कहबैत अछि ।

एतय उल्लिखित पाँतीमे उपमेय पुष्प पर उपमान बालाक आरोपसँ रूपक अलंकार भेल । तथा अत्यन्त हर्षवर्द्धक वस्तुक प्राप्ति भेलासँ प्रहर्षन भेल । एकर लक्षण थिक :

**बिनु यतने यदि पूर्ति हो उत्कण्ठाक निवेश ।**
**वांछितसँ यदि अधिक वा फल हित यतन विशेष ।**
**सहसा सद्यः फल सकल 'प्रहर्षण'क थिक भेद ।।**[34]

अर्थात् बिनु यतने यदि पूर्ति होअए, वाञ्छितसँ अधिक यदि फलक प्राप्ति होअए एवं उपायक ताकेमे फलक प्राप्ति भ जाय– एहि तीनू स्थितिमे प्रहर्षण होइछ । एतय उपरिलिखित पाँतीमे वाञ्छितसँ अधिक फलक प्राप्ति होयबाक कारणे ँ प्रहर्षण अलंकार भेल ।

**क्यो प्रशंसा-पूल बान्हथु, निन्द्य अथवा क्यो बखानथु;**
**देथु क्यो सम्मान माला, वा पियाबथु ग्लानि प्याला ।**
**किन्तु नहि अनुभूति हो से जैं 'मधुप' अविकार छी हम ।।**[35]

उपर्युक्त पद्य उल्लेखालंकार थीक । एकर लक्षण अछि :

**क्वचिद्भेदाद् ग्रहीतृणां विषयाणां तथा क्वचित् ।**
**एकस्यानेकधोल्लेखो यः स उल्लेख उच्यते ।।**[36]

जतय कतहु ज्ञातृ-भेद वा विषय भेदसँ एक वस्तुक अनेक प्रकारसँ वर्णन होअय तँ उल्लेखालङ्कार कहबैत अछि ।

एतय उल्लिखित पाँती मे लेखक (कवि मधुप) अपन परिचयक उल्लेख स्वयं, अनेको उदाहरणक माध्यमे देलनि अछि, ते ँ उल्लेखालंकार भेल ।

अत: साराशत: कहल जा सकैत अछि जे मधुप प्रणीत मुक्तककाव्य आधुनिक मैथिली काव्य साहित्यक अत्यन्त महत्वपूर्ण अंग थीक । मधुपजी यमक ओ वक्रोक्तिक नियोजनमे मैथिली साहित्य मध्य अद्वितीय छथि । ई हिनक अलौकिक विद्वताक परिचायक थीक जे मुक्तकाव्य मध्य सेहो अलंकारक गुम्फनके ँ सहजहिँ देखल जाइछ ।मधुपजीक छ: गोट प्रकाशित मुक्तक काव्य थीक ।

## संदर्भ सूची–

1. अग्निपुराण : मूल संस्कृतक हिन्दी अनुवाद, प्र०– गीता प्रेस, गोरखपुर, सम्वत्- 2065
2. साहित्य दर्पण : विश्वनाथ, 6/314, पृ.– 589
3. छंद-योजना
4. कविचूड़ामणिक काव्यसाधना : डा० भीमनाथ झा, प्र० मै०अ०, पटना; वर्ष- 1989, पृ.– 117
5. नवीन गीत : सं० रमानाथ झा, भूमिका, पृ.– 3
6. तत्रैव, (उद्बोधन, मातृभाषा), पृ.– 19
7. तत्रैव, (मातृवन्दना), पृ.– 11
8. A Survey of Maithili Literature : राधाकृष्ण चौधरी, पृ.– 201
9. कविचूड़ामणिक काव्यसाधना : डा० भीमनाथ झा, पृ.– 120

10. History of Maithili Literature : जयकान्त मिश्र, प्र०- सा०आ०, दिल्ली पृ.- 298
11. झांकार : काशीकान्त मिश्र 'मधप', प्र० मैथिली प्रकाशन, कलकत्ता, वर्ष- 1960, पद सं०-1 (आवाहन)
12. काव्यप्रकाश : मम्मट, 10/139
13. साहित्यदर्पण : विश्वनाथ, 10-28
14. तत्रैव, 10-30
15. झांकार : श्री मधुप, पद सं.- 1 (मैथिलीसँ)
16. काव्यप्रकाश : मम्मट, 10/139
17. कुवलयानन्द : अप्पयदीक्षित
18. झांकार : श्री मधुप, पद सं.- 1 (कलमक अनुरोध)
19. तत्रैव- पद सं.- 2 (चकोरी)
20. साहित्य दर्पण : विश्वनाथ, 10/90
21. कुवलयानन्द : अप्पयदीक्षित
22. झांकार : श्री काशीकान्त मिश्र 'मधुप', पृ.- 32; 15 (मधुप)
23. साहित्य दर्पण : विश्वनाथ, 10/26
24. एकस्योपमेयोपमानत्वेनान्वयः । –रूय्यक : अलंकार सर्वस्व, सूत्र- 12
25. उपमानोपमेयत्वे यत्रैकस्यैव जाग्रतः । –जयदेव : चन्द्रालोक, 5-12
26. झांकार : श्री मधुप, पद सं.- 2 (झरल फूल)
27. तत्रैव- पद सं.- 3 (झरल फूल)
28. कुवलयानन्द : अप्पय दीक्षित
29. झांकार : श्री मधुप पद सं.- 1, 2, 3 (मलयज)
30. कुवलयानन्द : अप्पयदीक्षित
31. अलंकार-कमलाकर : प० दामोदर झा, पृ.- 26
32. झांकार : मधुप, पृ.- 75; 13 (परिचय)
33. अलंकार कमलाकर : पं० दामोदर झा
34. अलंकार-मालिका : सुरेन्द्र झा 'सुमन', सूत्र- 131-132, पृ.- 33
35. झांकार : मधुप, पृ.- 76; 15 (परिचय)
36. साहित्य दर्पण : विश्वनाथ, 10-37
37. शतदल : पं. काशीकान्त मिश्र 'मधुप', प्र०- बहेड़ा, दरभंगा, वर्ष- 1944, पृ.- घ एवं ङ (सुमनजी)
38. कविचूड़ामणिक काव्यसाधना : डा० भीमनाथ झा, पृ.- 129
39. शतदल : पं० काशीकान्त मिश्र 'मधुप', (उपहार-मधुप)
40. शतदल : मधुप, पृ.- 1, कल्पना सँ
41. शतदल : पं. काशीकान्त मिश्र 'मधुप', प्र०- बहेड़ा, दरभंगा, वर्ष- 1944, पृ.- 52; चम्पक सँ
42. अलंकार-मालिका : सुमनजी, सूत्र- 166, पृ.- 38
43. शतदल : पं० काशीकान्त मिश्र 'मधुप', पृ.- 11; रमणीसँ
44. तत्रैव, पृ.- 13; रमणी
45. तत्रैव, पृ.- 79; सोन
46. शतदल : पं० काशीकान्त मिश्र 'मधुप', प्र० बहेड़ा, दरभंगा, वर्ष- 1944, पृ.- 30; पत्रहीन तरू सँ
47. काव्यप्रकाश : मम्मट, 10-165
48. मैथिली साहित्यक इतिहास : डा० दुर्गानाथ झा 'श्रीश', प्र०- भारती पुस्तक केन्द्र, दरभंगा, वर्ष- 1991

**शोधच्छात्रा, मैथिली विभाग, ल.ना.मि.वि.दरभंगा**

ISSN – 2349-3100

# [i]नव्यसंस्कृतकवीनां जातकेषु कवित्वयोगविमर्शनम्

✍विघ्नेश-अय्यरः

कवते श्लोकान् ग्रथते वर्णयति वा[1] इति कविशब्दः व्युत्पद्यते । अग्निपुराणे उक्तम् – 'आपारे काव्यसंसारे कविरेकः प्रजापतिः । यथास्मै रोचते विश्वं तथेदं परिवर्तते[2]' ।। इति । एवं संस्कृतजगति कालिदासभवभूतिभासबाणभट्टादयः शताधिकाः कवयः प्रसिद्धाः सन्ति । पुनश्च साम्प्रतिके कालेऽपि संस्कृतकवीनां काव्यधारा निरन्तरं भृशं प्रवहत्येव । एतेषां कवीनां जातकेषु कीदृश्यः ग्रहस्थितयः कीदृशाः ग्रहयोगाः वा जातकं कविं कुर्वन्ति इति पराशरादिभिः विद्वद्भिः स्वग्रन्थेषु विवेचितं वर्तते । अस्य अध्ययनं कृत्वैव इदं शोधपत्रं लिख्यते । कालिदासप्रभृतीनां जन्मकालक्षेत्रादिषु स्पष्टता नास्तीति कारणात्, ये अधुना नव्यसंस्कृतसुकवयः सन्ति तेषां जातकेषु एतेषां ग्रहयोगानां प्रायोगिकम् अध्ययनं क्रियते । तदेव अग्रे सप्रमाणं निरूप्यते -

1. नाम – आचार्यः अभिराजराजेन्द्रमिश्रवर्यः ।

कृतयः - इक्षुगन्धा, जानकीजीवनम्, मधुपर्णी, सप्तधारा, अभिराजसहस्रकम्, श्रुतिम्भरा, संस्कृतशतकम् इत्यादिः ।

पुरस्काराः – 1988-तमे वर्षे साहित्य-अकादमी-पुरस्कारः, 2002-तमे वर्षे राष्ट्रपतिसम्मानम्, 2020-तमे वर्षे पद्मश्रीपुरस्कारः, वाल्मीकिसम्मानम्, वाचस्पतिसम्मानम्, विश्वभारतीसम्मानम् इत्यादिः।

उपाधिः - त्रिवेणीकविः ।

जन्मविवरणम् –

दिनम् – 26 Dec 1942

समयः – 4.30 सायम्

स्थानम् - जौनपुरम्, उत्तरप्रदेशः ।

तिथ्यादिः - आश्लेषानक्षत्रशनिवासरयुक्ता कृष्णपक्षचतुर्थी ।

जातकस्थितिः – मिथुनलग्नम्, तत्रैव गुरुः, द्वितीये चन्द्रः, तृतीये राहुः, षष्ठे मङ्गलः, सप्तमे सूर्यबुधशुक्राः, नवमे केतुः, द्वादशे च शनैश्चरः।

---

[1]शब्दकल्पद्रुमः - भा.2 पृ.सं.68 ।

[2]अग्निपुराणम् - 339.10 ।

कवित्वयोगः - तत्र जातके लग्ने वर्तमानः एव गुरुः कर्माधिपः(दशमाधिपः) वर्तते । तेन जातके कश्चित् कवित्वयोगः सिध्यति । यथोक्तं बृहत्पराशरहोराशास्त्रे – 'कर्मेशे लग्नगे जातो विद्वान् ख्यातो धनी कविः[3]' इति । एवमस्मिन् जातके योगः सिद्धो भवति ।

2. नाम – आचार्यः सत्यव्रतशास्त्रिवर्यः[4] ।

कृतयः – श्रीबोधिसत्त्वचरितम्, बृहत्तरं भारतम्, श्रीगुरुगोविन्दसिंहचरितम्, इन्दिरागान्धिचरितम्, श्रीरामकीर्तिमहाकाव्यम्, पत्त्रकाव्यम् इत्यादिः ।

पुरस्काराः – 1995-तमे वर्षे पद्मश्रीपुरसिकारः, 1994-तमे वर्षे कालिदाससम्मानम्, 1968-तमे वर्षे साहित्य-अकादमी-पुरस्कारः, 1985-तमे वर्षे शिरोमणिसंस्कृतसाहित्यकारपुरस्कारः, 1988-तमे वर्षे विशिष्टसंस्कृतसाहित्यकारपुरस्कारः, 1993-तमे वर्षे पण्डितजगन्नाथसंस्कृतपद्यरचनापुरस्कारः, 1994-तमे वर्षे देववाणीरत्नसम्मानम्, वाचस्पतिपुरस्कारः, शास्त्रचूडामणिपुरस्कारः, श्रीवाण्यलङ्करणसम्मानम् इत्यादिः ।

जन्मविवरणम् –

दिनम् – 29 Sept 1930

समयः – 9.50 प्रातः ।

स्थानम् – लाहोरम्, पाकिस्तानम् ।

तिथ्यादिः – स्वातिनक्षत्रशुक्रवासरयुक्ता शुक्लपक्षषष्ठी ।

जातकस्थितिः – तुलालग्नम्, तत्रैव शुक्रकेतू, तृतीये चन्द्रशनी, सप्तमे राहुः, नवमे मङ्गलगुरू, एकादशे बुधः, द्वादशे सूर्यश्च ।

कवित्वयोगः – दशमभावाधिपतिः चन्द्रः, स एव बुधनवांशे स्थितः कवित्वं करोति । उक्तं च बृहज्जातके – 'सौम्यांशे लिपिगणितादिकाव्यशिल्पैः[5]' इति । एवं जातके कवित्वयोगः सिद्धः ।

3. नाम – आचार्यः श्रीधरभास्करवर्णेकरवर्यः[6] ।

कृतयः – शिवराज्योदयम्(68 सर्गात्मकम्), विवेकानन्दविजयम् इत्यादिः ।

पुरस्काराः – राष्ट्रपतिपुरस्कारः, कालिदासपुरस्कारः, सरस्वतीसम्मानम्, साहित्य-अकादमी-पुरस्कारः च ।

---

[3] बृहत्पराशरहोराशास्त्रम् - अ.24 श्लो.109 ।

[4] https://en.wikipedia.org/wiki/Satya_Vrat_Shastri , https://www.satyavrat-shastri.net/

[5] बृहज्जातकम् - अ.10 श्लो.2 ।

[6] https://en.wikipedia.org/wiki/Shridhar_Bhaskar_Warnekar , https://www.warnekar.net/pradnyabharati

उपाधिः – प्रज्ञाभारती ।

जन्मविवरणम् –

दिनम् – 31 July 1918

समयः – 2.00 प्रातः (प्रायः) ।

स्थानम् – नागपुरम्, महाराष्ट्रम् ।

तिथ्यादिः – भरणीनक्षत्रबुधवासरयुक्ता कृष्णपक्षनवमी ।

जातकस्थितिः – वृषभं लग्नम्, तत्रैव केतुः, द्वितीये गुरुशुक्रौ, तृतीये सूर्यशनी, चतुर्थे बुधः, पञ्चमे मङ्गलः, सप्तमे राहुः, द्वादशे चन्द्रश्च ।

कवित्वयोगः – अत्र द्वितीयभावे स्थितः गुरुः मिथुनराशिस्थः अस्ति । स एव जातकं कविं करोति । उक्तं च सारावल्याम् – 'मिथुनस्थे देवगुरौ क्रियारातिः सत्कविश्चैव[7]' इति । एवं जातके कवित्वं वर्तते ।

4. नाम – आचार्यः.N.रङ्गनाथशर्मवर्यः[8] ।

कृतयः – बाहुबलिविजयम्, एकचक्रनाटकम्, काव्योद्यानम् इत्यादिः ।

पुरस्काराः – DVG-स्मृतिपुरस्कारः, राज्योत्सवपुरस्कारः, संस्कृतपुस्तकलेखनपुरस्कारः इत्यादिः ।

उपाधिः – महामहोपाध्यायः ।

जन्मविवरणम् –

दिनम् – 7 May 1916

समयः – 7.00 प्रातः (प्रायः) ।

स्थानम् – शिवमोग्गा, कर्णाटकम् ।

तिथ्यादिः – आर्द्रानक्षत्ररविवासरयुक्ता शुक्लपक्षपञ्चमी ।

जातकस्थितिः – वृषलग्नम्, लग्ने बुधः, द्वितीये चन्द्रशुक्रशनयः, तृतीये मङ्गलकेतू, नवमे राहुः, एकादशे गुरुः, द्वादशे सूर्यश्च ।

कवित्वयोगः – जातके चन्द्राद् द्वादशभावे बुधस्थित्याऽस्मिन् कवित्वयोगः सिध्यति । तच्च सारावल्याम् उक्तम् – 'गन्धर्वलेख्यपटुः कविः प्रवक्ता नृपाप्तसत्कारः । रुचिरतनुस्त्वनभायां प्रसिद्धकर्मा बुधेन भवेत्[9]' इति । एवं जातके कवित्वयोगसिद्धिः ।

---

[7]सारावली - अ.27 श्लो.6 ।

[8]https://en.wikipedia.org/wiki/N._Ranganatha_Sharma , https://vidwannrs.in/About

[9]सारावली - अ.13 श्लो.16 ।

5. नाम – आचार्यः हर्षदेवमाधववर्यः[10] ।

कृतयः – अलकनन्दा, मृगया, बृहन्नला, आसीच्च मे मनसि, तव स्पर्शे स्पर्शे, निष्क्रान्ताः सर्वे, पुरा यत्र स्रोतः, कालोऽस्मि, तथास्तु, कल्पवृक्षः इत्यादिः ।

पुरस्काराः – 1979-तमे वर्षे कविलोकशिशुकाव्यपुरस्कारः, 1997-98-तमे विद्यावर्षे कल्पवल्लीपुरस्कारः, 1998-तमे वर्षे रामकृष्णसंस्कृतपुरस्कारः, 2006-तमे वर्षे साहित्य-अकादमी-पुरस्कारः, 2010-तमे वर्षे साहित्यगौरवपुरस्कारः, 1998-तमे वर्षे कालिदाससम्मानं च ।

जन्मविवरणम् –

दिनम् – 20 Oct 1954

समयः – 1.45 अपराह्णे ।

स्थानम् – भावनगरम्, गुजरातप्रदेशः ।

तिथ्यादिः – आश्लेषानक्षत्रबुधवासरयुक्ता कृष्णपक्षनवमी

जातकस्थितिः – मकरो लग्नम्, तस्मिन्नेव मङ्गलः, षष्ठे केतुः, सप्तमे चन्द्रगुरू, दशमे सूर्यबुधशुक्राः, एकादशे शुक्रो द्वादशे च राहुः ।

कवित्वयोगः – कर्कराशौ एकविंशेंऽशे चन्द्रः वर्तते । कर्के एव पञ्चमेंऽशे गुरुः । तुलायां बुधः एकविंशेंऽशे वर्तते । अनेन चन्द्रः गुरुबुधमध्यस्थः कवित्वयोगं करोति । सारावल्यामुक्तम् – 'धर्मपरः शास्त्रज्ञो वाचालः सत्कविर्धनोपेतः । त्यागयुतो विख्यातो बुधगुरुमध्ये स्थिते चन्द्रे[11]' इति । एवं जातके कवित्वयोगसिद्धिः ।

6. नाम – आचार्यः जगन्नाथपाठकवर्यः[12] ।

कृतयः – मृद्वीका, पिपासा, कापिशायनी, विच्छित्तिवातायनी, आर्यासहस्रारामम्, विकीर्णपत्रलेखम्, जगन्नाथसुभाषितम् इत्यादिः ।

पुरस्काराः – 1992-तमे वर्षे वाचस्पतिपुरस्कारः, 1981-तमे वर्षे साहित्य-अकादमीपुरस्कारः, 2011-तमे वर्षे मीरास्मृतिसम्मानम्, 2001-तमे वर्षे संस्कृतसाहित्यपुरस्कारः, 2004-तमे वर्षे शब्दशिखरसम्मानम्, 2016-तमे वर्षे विश्वभारतीसम्मानम् इत्यादिः ।

उपाधिः – संस्कृतरत्नम् ।

जन्मविवरणम् –

[10]https://en.wikipedia.org/wiki/Harshadev_Madhav , http://harshdevmadhav.blogspot.com/

[11]सारावली - अ.13 श्लो.24 ।

[12]https://en.wikipedia.org/wiki/Jagannath_Pathak , https://www.jagannathpathak.info/

 ISSN – 2349-3100

दिनम् – 2 Feb 1934

समयः – 10.00 रात्रौ (प्रायः) ।

स्थानम् – सासारामः, बिहारम् ।

तिथ्यादिः – पूर्वफल्गुणीनक्षत्रशुक्रवासरयुक्ता कृष्णपक्षतृतीया ।

जातकस्थितिः – कन्यालग्नम्, द्वितीये गुरुः, पञ्चमे सूर्यबुधशुक्रशनिराहवः, षष्ठे मङ्गलः, एकादशे केतुः, द्वादशे चन्द्रश्च ।

कवित्वयोगः – जातकस्य आत्मकारकः(सर्वाधिकांशवान्) बुधः स च नवांशे कन्याराशिस्थः । तस्मात् पञ्चमे वर्तते शुक्रः स एव कवित्वकारकः । उक्तं च ‘भार्गवे तु कविर्वाग्मी काव्यज्ञो जायते जनः[13]’ इति बृहत्पराशरहोराशास्त्रे ।

7. नाम – आचार्यः श्रीनाथ-श्रीपाद-हसूरकरः[14] ।

कृतयः – सिन्धुकन्या, प्रतिज्ञापूर्तिः, दावानलः, अजातशत्रुः इत्यादिः ।

पुरस्काराः – 1985-तमे वर्षे साहित्य-अकादमी-पुरस्कारः, बाणभट्टपुरस्कारः, सारस्वतसम्मानम् इत्यादिः ।

जन्मविवरणम् –

दिनम् – 15 Feb 1922

समयः – 1.45 अर्धरात्रौ ।

स्थानम् – इन्दोरम्, मध्यप्रदेशः ।

तिथ्यादिः – हस्तनक्षत्रबुधवासरयुक्ता कृष्णपक्षचतुर्थी ।

जातकस्थितिः – वृश्चिकलग्नम्, तत्रैव मङ्गलः, चतुर्थे सूर्यबुधशुक्राः, पञ्चमे केतुः, एकादशे चन्द्रगुरुशनिराहवः च ।

कवित्वयोगः – अत्र लग्नस्थः लग्नाधिपतिः मङ्गलः एव कवित्वं सूचयति । यथा च बृहत्पराशरहोरायाम् – ‘लग्नेशे लग्नगे जातः सात्त्विको धनवान् सुखी । समदृष्टिः कविर्वाग्मी सदा लाभसमन्वितः[15]’ इति । एवं कवित्वयोगः जातके सिद्धः ।

8. नाम – आचार्यः केशबचन्द्रदाशः[16] ।

---

[13]बृहत्पराशरहोराशास्त्रम् - अ.34 श्लो.40 ।

[14]http://shrinathhasurkar.blogspot.com/2010/05/biography.html

[15]बृहत्पराशरहोराशास्त्रम् - अ.24 श्लो.21 ।

[16]https://en.wikipedia.org/wiki/Keshab_Chandra_Dash , http://profkeshabchandradash.blogspot.com/

कृतयः – प्रणयप्रदीपम्, हृदयेश्वरी, महातीर्थम्, अलका, ईशा, भिन्नपुलिनम्, अन्धस्रोतः, निम्नपृथिवी, शून्यनाभिः, एकदा, पताका, शशिरेखा, शीतलतृष्णा, तिलोत्तमा इत्यादिः ।

पुरस्काराः – श्रीवाणीसाहित्यसंसत्पुरस्कारः, साहित्य-अकादमी-पुरस्कारः, उत्कल-साहित्य-अकादमी-पुरस्कारः, बाणभट्टपुरस्कारः, कल्पवल्लीपुरस्कारः, वेदव्याससम्मानम्, पण्डितकुलमणिमिश्रपुरस्कारः, डा.वी.राघवन्-राष्ट्रियपुरस्कारः इत्यादिः ।

उपाधिः – विद्वन्मणिः, तन्त्रसरस्वती ।

जन्मविवरणम् –

दिनम् – 14 July 1955

समयः – 10.55 प्रातः ।

स्थानम् – जजपुरम्, ओडीसा ।

तिथ्यादिः – भरणीनक्षत्रगुरुवासरयुक्ता कृष्णपक्षनवमी ।

जातकस्थितिः – कन्यालग्नम्, द्वितीये शनिः, चतुर्थे राहुः, अष्टमे चन्द्रः, दशमे सूर्यबुधशुक्रकेतवः, एकादशे अङ्गारकगुरू च ।

कवित्वयोगः – जातके मिथुनराशिस्थितः बुधः कवित्वयोगसूचकः अस्ति । यथा प्रोक्तं सारावल्याम् – 'श्रुतिकल्पकलाभिज्ञः कविः स्वतन्त्रः प्रियः प्रदानरतः । कर्मठबहुसुतमित्रो नरमिथुनस्थे बुधे भवति[17]' इति । एवं जातके कवित्वयोगसिद्धिः ।

9. नाम – आचार्यः बलरामशुक्लवर्यः[18] ।

कृतयः – लघुसन्देशम्, परीवाहः, कवितापुत्रिकाजातिः इत्यादिः ।

पुरस्काराः – 2013-तमे वर्षे महर्षिबादरायणव्याससम्मानम्, 2017-तमे वर्षे पण्डितप्रतापनारायणमिश्रयुवसाहित्यकारसम्मानम्, 2018-तमे वर्षे कालिदाससम्मानम् इत्यादिः

जन्मविवरणम् –

दिनम् – 25 Sept 1981

समयः – 1.00 अपराह्णम् ।

स्थानम् – गोरखपुरम्, उत्तरप्रदेशः ।

तिथ्यादिः – मघानक्षत्रशुक्रवासरयुक्ता कृष्णपक्षद्वादशी ।

जातकस्थितिः – धनुर्लग्नम्, द्वितीये केतुः, अष्टमे अङ्गारकराहू, नवमे चन्द्रः, दशमे सूर्यगुरुशनयः, एकादशे बुधशुक्रौ च ।

[17]सारावली - अ.26 श्लो.6 ।

[18]https://en.wikipedia.org/wiki/Balram_Shukla , https://balramshukla.wordpress.com/

कवित्वयोगः – जातके आत्मकारकः(सर्वाधिकांशवान्) गुरुः, कारकांशश्च(गुरुस्थितनवांशराशिः) कर्कराशिः। तस्मात् भावचक्रे पञ्चमभावे शुक्रः स्थितः, स एव जातकस्य कवित्वं विधत्ते । यथा बृहत्पराशरहोरायां कारकांशाध्याये पञ्चमभावफले – 'भार्गवे तु कविर्वाग्मी काव्यज्ञो जायते[19]' जनः इति कथितम्। एवं जातके कवित्वयोगः सिद्धः।

10. नाम – आचार्यः मधुसूदनपेन्नवर्यः[20] ।

कृतयः – प्रज्ञाचाक्षुषम् इत्यादिः ।

पुरस्काराः – साहित्य-अकादमी-पुरस्कारः इत्यादिः ।

जन्मविवरणम् –

दिनम् – 27 Nov 1967

समयः – 11.14 प्रातः ।

स्थानम् – हैदराबादः ।

तिथ्यादिः – उत्तरफल्गुणीनक्षत्रसोमवासरयुक्ता कृष्णपक्षदशमी ।

जातकस्थितिः – मकरलग्नम्, तत्रैव मङ्गलः, तृतीये शनिः, चतुर्थे राहुः, अष्टमे गुरुः, नवमे चन्द्रशुक्रौ, दशमे बुधकेतू, एकादशे च सूर्यः ।

कवित्वयोगः – प्रोक्तं सारावल्याम् – 'श्रुतिशास्त्रगेयकुशलो धर्मपरः काव्यकृन्मनस्वी च । सर्वहितो रुचिरतनुः सुनभायां सोमजे भवति[21]' इति । एवं जातकेऽस्मिन् कवित्वयोगः सिद्धः ।

एवम् अन्येऽपि बहवः प्रसिद्धाः अप्रसिद्धाः संस्कृतसुकवयः सन्ति । तेषां जातकादि मया प्राप्तुम् न शक्तम् इति कारणादेव ते न उदाहृताः । पुनश्च गौरवभियाऽपि केचन न उदाहृताः इति संसूच्य विस्तराद्विरम्यते ।

विघ्नेश-अय्यरः
शोधच्छात्रः
केन्द्रीयसंस्कृतविश्वविद्यालयः
भोपालपरिसरः

---

[19] बृहत्पराशरहोराशास्त्रम् - अ.34 श्लो.40 ।

[20] https://www.esamskriti.com/author/Dr.Penna-Madhusudan.aspx , https://www.linkedin.com/in/madhusudan-penna-98a31575/?originalSubdomain=in

[21] सारावली - अ.13 श्लो.11 ।

 ISSN – 2349-3100

---

i पादटिप्पणी


1. शब्दकल्पद्रुमः - राजाराघवकान्तदेवबहादुरः - चौखम्बा संस्कृत सीरीज, वाराणसी - 1967
2. अग्निपुराणम् - आचार्य शिवप्रसाद द्विवेदी - चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली - 2004
3. बृहत्पराशरहोराशास्त्रम् - डा.पद्मनाभ शर्मा - चौखम्बा सुरभारती प्रकाशन, वाराणसी - 2016
4. फलदीपिका - S.S.सारीन – सागर पब्लिकेशन्स, दिल्ली - 1992
5. बृहज्जातकम् - डा. रामचंद्र पाठक – चौखम्बा प्रकाशन - 2013
6. सारावली - कल्याणवर्मा - निर्णय सागर प्रेस, मुम्बापुरी - 1907

अन्तर्जालसङ्केतसूची

1. www.wikipedia.com
2. www.sanskrit.nic.in
3. www.wordpress.com
4. www.loc.gov
5. www.satyavrat-shastri.net
6. www.blogspot.com
7. www.warnekar.net
8. www.vidwannrs.in
9. www.jagannathpathak.info
10. www.esamskrit.com
11. www.linkedin.com